অথ সপিণ্ডীকরণং ॥ * ॥ তত্র প্রথমং বৈশ্বদেবানুষ্ঠানং ততঃ পিতামহাদিত্রয়পার্ব্বণানুষ্ঠানং. প্রেতপিত্রাদৌ
জীবতি পূর্ব্ব পুরুষত্রয়েণ সপিণ্ডনং স্ত্রিয়াস্তু পুত্রসত্ত্বে পত্যাদি পুরুষত্রয়েণ পত্যাদৌ জীবতি শ্বশ্র্বাদিভি স্ত্রিসৃভিরিতি
বিশেষঃ শ্বশ্রূমপি জীবন্ত্যাং তৎ শ্বশ্র্বাদিভিরিতি। ততঃ কৃত স্নানাদি দেবপূজান্তকৃত্যঃ শেষ মাসিকং কৃত্বা পরাহ্ণে তদ-
সামর্থ্যে শ্রাদ্ধপর্য্যন্তেতর কালে বা পার্ব্বণশ্রাদ্ধ পূর্ব্বকালীনং কর্ম্ম কৃত্বা উপলিপ্তায়াং ভূমৌ দর্ভাসনে চোপবিশ্য তিলতৈলেন
দীপং প্রজ্বাল্য নমো বাস্তুপুরুষায় নম ইতি বাস্তুং সংপূজ্য ওঁ তদ্বিষ্ণোরিত্যাদৌ ব্রাহ্মণেন পঠিতে নমো নম ইত্যুচ্চার্য্য
যজ্ঞেশ্বরং সংপূজ্য শ্রাদ্ধাগ্রভাগং দত্ত্বা পরভূমৌ চেন্মূল্যমথবা পিতৃরীত্যা ইদমন্নং নম এতদ্ভূস্বামি পিতৃভ্যো নম ইতি দদ্যাৎ
এতৎ স্বভূমাবস্বামিক ভূমৌ চ ন বিদ্যতে। ততো দৈবে দর্ভযুক্তাসনদ্বিতয়ে দর্ভবটুদ্বয়ং সংস্থাপ্য পিতামহাদি পক্ষে ৪৬১
দর্ভযুক্তাসন ত্রিতয়ে দর্ভবটুত্রয়ং সংস্থাপ্য তৎপূর্ব্বে প্রেতপক্ষে দর্ভযুক্তাসনে দর্ভবটুং নিধায় বামোত্তরীয় উত্তরামুখঃ পাতিত
দক্ষিণজানুর্দৈবে জলগণ্ডূষং দত্ত্বা নমো ঽদ্যামুক মাস্যমুক পক্ষে ঽমুক তিথৌ অমুক গোত্রস্য প্রেতস্যামুক দত্ত দাসস্য সপিণ্ডী-
করণার্থং অমুক গোত্রস্য পিতামহস্যামুক দত্ত দাসস্যামুক গোত্রস্য প্রপিতামহস্যামুক দত্ত দাসস্য পার্ব্বণবিধিনা শ্রাদ্ধে
কর্ত্তব্যে পুরূরবো মাদ্রবসোর্ব্বিশ্বেষাং দেবানাং পার্ব্বণবিধিনা শ্রাদ্ধং দর্ভময় ব্রাহ্মণয়োরহং করিষ্যে। ওঁ কুরুষ্বেতি প্রতি
বচনং। ততঃ পিতামহাদি পক্ষে দক্ষিণামুখো দক্ষিণোত্তরীয়ঃ পাতিত বামজানুঃ। নমোঽদ্যামুকে মাস্যমুক পক্ষে ঽমুক
তিথৌ অমুক গোত্রস্য প্রেতস্যামুক দত্ত দাসস্য সপিণ্ডীকরণার্থং অমুক গোত্রস্য পিতামহস্যামুক দত্ত দাসস্যামুক গোত্রস্য

প্রপিতামহস্যামুক দত্ত দাসস্যামুক গোত্রস্য বৃদ্ধপ্রপিতামহস্যামুক দত্ত দাসস্য পার্ব্বণবিধিনা শ্রাদ্ধং দর্ভময় ব্রাহ্মণেহহং করিষ্যে ওঁ কুরুষেত্যুক্তে সপ্রণব ব্যাহৃতিকাং গায়ত্রীং ওঁ দেবতাভ্য ইত্যাদি চ ব্রাহ্মণেন ত্রিঃ পঠিতে নমো নম ইতি জপেৎ। ততঃ প্রেতপক্ষে দক্ষিণামুখঃ পাতিত বামজানুর্দক্ষিণোত্তরীয়ঃ নমোঽদ্যামুকে মাস্যমুক পক্ষে ঽমুক তিথৌ অমুক গোত্রস্য প্রেতস্যামুক দত্ত দাসস্য সপিণ্ডীকরণার্থমেকোদ্দিষ্ট শ্রাদ্ধং দর্ভময় ব্রাহ্মণেঽহং করিষ্যে। ওঁ কুরুষেতি প্রত্যুক্তে সপ্রণব ব্যাহৃতিকাং গায়ত্রীং ওঁ দেবতাভ্য ইত্যাদি ব্রাহ্মণেন ত্রিঃ পঠিতে নমো নম ইতি জপেৎ। ততো মন্ত্রজলেন শ্রাদ্ধীয় দ্রব্য প্রোক্ষণং রক্ষার্থমুদক পূর্ণ পাত্রমেকদেশে স্থাপয়েৎ ততঃ উত্তরামুখঃ পাতিত দক্ষিণজানুর্ব্বামোত্তরীয় ব্রাহ্মণে জলং দত্ত্বা নমঃ পুরূরবো মাদ্রবসৌ বিশ্বে দেবা এতদ্বঃ কুশাসনং নম ইতি ঋজু দর্ভান্ ব্রাহ্মণ দক্ষিণপার্শ্বে দদ্যাৎ। ততো দক্ষিণামুখো দক্ষিণোত্ত- 
রীয় পাতিত বামজানু ব্রাহ্মণ হস্তে জলং দত্ত্বা নমো ঽমুক গোত্র প্রপিতামহামুক দত্ত দাস অমুক গোত্র বৃদ্ধপ্রপিতামহামুক দত্ত দাস এতত্তে কুশাসনং নমঃ। ইতি দ্বিগুণ ভুগ্ন মোটকং পিতামহাদি ব্রাহ্মণ বামপার্শ্বে দদ্যাৎ। ততঃ প্রেতপক্ষে রক্ষার্থ মুদক পূর্ণপাত্রমেকদেশে স্থাপয়িত্বা নমো ঽমুক গোত্র প্রেতামুক দত্ত দাস এতত্তে কুশাসনং নম ইত্যুৎসৃজ্য মোটকং প্রেতব্রাহ্মণ বামপার্শ্বে দদ্যাৎ। তত উত্তরামুখঃ পাতিত দক্ষিনজানু র্বামোত্তরীয়ো যবান্ গৃহীত্বা নমো বিশ্বান্ দেবানাবাহয়িষ্যে ইতি পৃচ্ছেৎ ওঁ আবাহয়েত্যুত্তরং ওঁ বিশ্বেদেবাস আগত শৃণুতা ম ইমং হবং এদং বর্হির্নিষীদত ইতি ব্রাহ্মণেন পঠিতে নমো নম ইত্যাবাহ্ তক্ষীং যবান্ বিকীরেৎ। ততঃ কৃতাঞ্জলিঃ ওঁ বিশ্বেদেবাঃ শৃণুতেমং হবং যে মে ঽন্তরীক্ষে যে উপদ্যবিষ্ঠ যে অগ্নিজিহ্বা উত বা

যজত্রা আসাদ্যাস্মিন্ বর্হিষি মাদয়ধ্বং ইতি ব্রাহ্মণেন পঠিতে নমো নম ইতি জপেৎ। ততো দক্ষিণামুখো দক্ষিণোত্তরীয়ঃ পাতিত বামজানুস্তিলান্ গৃহীত্বা নমঃ পিতৄনাবাহয়িষ্যে ইতি পঙ্‌ক্তিশ্রেষ্ঠব্রাহ্মণং পৃচ্ছেৎ ওঁ আবাহয়েত্যনুজ্ঞাতঃ ওঁ উশন্তস্ত্বা নিধীমহ্যুশন্তঃ সমিধীমহি উশন্নুশত আবহ পিতৄন্ হবিষে অত্তবে। ইতি ব্রাহ্মণেন পঠিতে নমো নম ইত্যনেনাবাহয়েৎ। ওঁ আয়ান্তু নঃ পিতরঃ সোম্যাসো ঽগ্নিস্বাত্তাঃ পথিভির্দেবযানৈ রস্মিন্ যজ্ঞে স্বধয়া মদন্তো ঽধিব্রুবন্তু তে ঽবন্ত্বস্মান্ ইতি ওঁ অপহতা সুরারক্ষাংসি বেদিষদ ইতি ব্রাহ্মণেন পঠিতে নমো নম ইতি তিলান্ বিকীর্য্য জলং স্পৃষ্ট্বা দৈবাদিক্রমেণ ব্রাহ্মণ সম্মুখে দর্ভোপরি পাত্রচতুষ্টয়ং সংস্থাপ্য প্রেতব্রাহ্মণাগ্রতো দক্ষিণাগ্রকুশোপরি পাত্রমেকং স্থাপয়েৎ। ততো দৈবাদিক্রমেণ ওঁ পবিত্রে স্থো বৈষ্ণব্যাবিতি ব্রাহ্মণেন পঠিতে নমো নম ইত্যনখছিন্নং ওঁ বিষ্ণোর্মনসাপূতেস্থ ইতি ব্রাহ্মণেন পঠিতে নমো নম ইত্যনেন প্রোক্ষিতং পবিত্রমেকৈকস্মিন্ পাত্রে একৈকং বিন্যস্য ততঃ কুশপত্রমেকং প্রাদেশমাত্রং সাগ্রং ওঁ পবিত্রাসি বৈষ্ণবি ইতি ব্রাহ্মণেন পঠিতে নমো নম ইত্যনেনানখছিন্নং ওঁ বিষ্ণোর্মনসা পূতমসীতি ব্রাহ্মণেন পঠিতে নমো নম ইত্যনেন প্রোক্ষিতং প্রেতপাত্রে স্থাপয়িত্বা ওঁ শন্নোদেবীরভিষ্টয়ে আপোভবন্ত্বিত্যাদি ব্রাহ্মণেন পঠিতে নমো নম ইত্যনেন দৈবাদিক্রমেণ জলং দদ্যাৎ। ততো দৈবে ওঁ যবোঽসীত্যাদি ব্রাহ্মণেন পঠিতে নমো নম ইত্যনেন যবান্ বিকীরেৎ। ততঃ পিতামহাদিপাত্রেষু ওঁ তিলোঽসীত্যাদি ব্রাহ্মণেন পঠিতে নমো নম ইতি তিলান্ বিকীরেৎ। প্রেতপক্ষে তু পিতৄন্ লোকানিত্যত্র প্রেতান্ লোকানিতি বদেৎ। ততো দৈবাদিক্রমেণ তূষ্ণীং গন্ধপুষ্পে দত্ত্বা নমো অচ্ছিদ্রাণ্যর্ঘ্যপাত্রাণি সন্তিত্যবধারয়েৎ ততো দেব-

ব্রাহ্মণ হস্তে প্রাগগ্রং পবিত্রং দদ্যাৎ জলান্তরঞ্চ দত্ত্বা পুষ্পান্তরেণ শিরঃ প্রভৃতি সর্ব্বগাত্রেভ্যো নম ইত্যনেন পূজয়েৎ। ততো
বামহস্তেন পাত্রং ধৃত্বা দক্ষিণহস্তেনাচ্ছাদ্য ওঁ যা দিব্যা আপঃ পয়সেত্যাদি ব্রাহ্মণেন পঠিতে নমো নম ইতি জপ্ত্বা নমঃ পুরূরবো
মাদ্রবসৌ বিশ্বেদেবা এষ বো হর্ঘ্যো নম ইত্যনেনার্ঘ্যং দদ্যাৎ। ততঃ প্রেতপক্ষে নমো হচ্ছিদ্রমিদমর্ঘ্যপাত্রমস্ত্বিত্যবধারয়েৎ
ওঁ অস্ত্বিতি প্রতিবচনং ততস্তৎ পবিত্রং প্রেতব্রাহ্মণহস্তে দত্ত্বা জলান্তরং দত্ত্বা পুষ্পান্তরঞ্চ দত্ত্বা পূর্ব্ববৎ পাত্রং ধৃত্বা যা দিব্যা
ইত্যাদি ব্রাহ্মণেন পঠিতে নমো নম ইতি জপ্ত্বা নমো হমুক গোত্র প্রেতামুক দত্ত দাস এষ তে হর্ঘ্যো নম ইত্যুৎসৃজ্য ওঁ যে
সমানাঃ সমনসঃ পিতরো যমরাজ্যে তেষাং লোকঃ স্বধা নমো যজ্ঞো দেবেষু কল্পতাং। ওঁ যে সমানাঃ সমনসো জীবা জীবেষু
মামকাঃ তেষাং শ্রীর্ময়িকল্পতামস্মিন্ লোকে শতং সমাঃ ইতি ব্রাহ্মণেন পঠিতে নমো নমঃ ইত্যুচ্চার্য্য তজ্জলং চতুর্ভাগং ৪৬৪
কৃত্বা ভাগমেকং প্রেতব্রাহ্মণ হস্তে দদ্যাৎ। ততঃ পিতামহাদি ব্রাহ্মণে পবিত্রং দক্ষিণাগ্রং জলান্তরং পুষ্পান্তরঞ্চ দত্ত্বা পিতামহার্ঘ্য
পাত্রং বামহস্তেন ধৃত্বা দক্ষিণ হস্তেনাচ্ছাদ্য ওঁ যা দিব্যা ইত্যাদি ব্রাহ্মণেন পঠিতে নমো নম ইত্যুচ্চার্য্য নমোহমুক গোত্র
পিতামহামুক দত্ত দাস এষ তে হর্ঘ্যো নম ইত্যুৎসৃজ্য ওঁ যে সমানাঃ সমনসঃ ইত্যাদি মন্ত্রদ্বয়ং ব্রাহ্মণেন পঠিতে নমো নম
ইত্যুচ্চার্য্য প্রেতার্ঘ্য জলভাগস্য ভাগমেকং তত্র মিশ্রয়িত্বা পিতামহব্রাহ্মণে দদ্যাৎ। এবং ক্রমেণ প্রপিতামহবৃদ্ধপ্রপিতা-
মহয়োরর্ঘ্যং দদ্যাৎ। ততো হস্তৌ প্রক্ষাল্যাচম্য দক্ষিণ শ্রবণং স্পৃষ্ট্বা বা প্রপিতামহ বৃদ্ধপ্রপিতামহপাত্রস্থ জলং পিতামহ
পাত্রে নিধায় বৃদ্ধপ্রপিতামহ পাত্রেণাচ্ছাদ্য কর্ত্তুর্বামতো ন্যুব্জং ওঁ পিতৃভ্য স্থানমসীতি ব্রাহ্মণেন পঠিতে নমো নম ইত্যু-

চ্চার্য্য কুর্য্যাৎ। তত উত্তরামুখঃ পাতিত দক্ষিণজানুর্ব্বামোত্তরীয়ো নমঃ পুরূরবো মাদ্রবসৌ বিশ্বেদেবা এতানি বো গন্ধ পুষ্প ধূপ দীপাচ্ছাদনানি নম ইত্যুৎসৃজ্য এষ বো গন্ধঃ এতদ্বঃ পুষ্পং এষ বো ধূপঃ এষ বো দীপঃ এতদ্ব আচ্ছাদনং ইতি দেব-ব্রাহ্মণে ক্ষিপেৎ। ততো দক্ষিণামুখঃ পাতিতবামজানুঃ প্রাচীনাবীতী নমো ঽমুক গোত্র পিতামহামুক দত্ত দাস অমুক গোত্র প্রপিতামহামুক দত্ত দাস অমুক গোত্র বৃদ্ধপ্রপিতামহামুক দত্ত দাস এতানি তে গন্ধপুষ্প ধূপদীপাচ্ছাদনানি নম ইত্যুৎসৃজ্য এষ তে গন্ধঃ এতত্তে পুষ্পং এষ তে ধূপঃ এষ তে দীপঃ এতত্তে আচ্ছাদনং। ততঃ প্রেতপক্ষে নমো ঽমুক গোত্র প্রেতামুক দত্ত দাস এতানি তে গন্ধপুষ্প ধূপদীপাচ্ছাদনানি নম ইত্যুৎসৃজ্য এষ তে গন্ধ এবং ক্রমেণ দদ্যাৎ। ততো দৈ-
বাদিক্রমেণ ব্রাহ্মণাগ্রস্থিতং কুশাদিকং সমস্তমেবাপনীয় দৈবে ঐশানীমারভ্য প্রাগগ্রান্তয়া রেখয়া দক্ষিণাবর্ত্তেন পিত্র্যে নৈর্ঋতী ৪৬৫
মারভ্য দক্ষিণাগ্রান্তয়া রেখয়া বামাবর্ত্তেন চতুষ্কোণ মণ্ডলং কৃত্বা প্রেতপক্ষেপ্যেবং দৈবাদিক্রমেণ তদুপরি পাত্রাণি সংস্থাপ্য সঘৃত-মন্নমাদায় নমো অগ্নৌ করিষ্যে ইতি ব্রাহ্মণং পৃচ্ছেৎ ওঁ কুরুষেত্যুক্তে অগ্নয়ে কব্যবাহনায় স্বাহা ওঁ সোমায় পিতৃমতে স্বাহা ইতি ব্রাহ্মণেন পঠিতে নমো নম ইত্যুচ্চার্য্য দ্বয়ং হুতশেষং দৈবপাত্রে বারদ্বয়ং পিতামহাদিপাত্রে বারত্রয়ং হুত্বা পিণ্ডার্থং কিঞ্চিৎ স্থাপয়েৎ। ততো দৈবপাত্রে ঽনুত্তান হস্তাভ্যাং ধৃত্বা ওঁ পৃথিবীতে পাত্রমিত্যাদি ব্রাহ্মণেন পঠিতে নমো নম ইতি জপেৎ পিত্র্যে তু উত্তানহস্তাভ্যামিতি বিশেষঃ। ততো দৈবাদিক্রমেণান্নাদিকং পাত্রান্তরিত হস্তাভ্যাং পরিবেশয়েৎ। উপকরণঞ্চ পাত্রান্তরে কৃত্বা ভূমৌ স্থাপয়েৎ। পাত্রব্যতিরিক্তং ভোজনপাত্রে দদ্যাৎ ন তু পাত্রান্তরে কৃত্বা পাত্রোপরি দদ্যাৎ। ততঃ

প্রেতপক্ষে হন্নাদিকং পরিবেশয়েৎ। ততো দৈবাদি ক্রমেণান্নপাত্রং বামহস্তেন ধৃত্বা ওঁ বিষ্ণো হব্যং রক্ষস্বেত্যভ্যুক্ষ্য পিত্র্যে কব্যমিতি বিশেষঃ ওঁ ইদং বিষ্ণুর্ব্বিচক্রমে ত্রেধা নিদধে পদং সমূঢ়মস্য পাংশুলে। ইতি ব্রাহ্মণেন পঠিতে নমো নম ইত্যুচ্চার্য্যান্নাদাবনখমঙ্গুষ্ঠং ক্ষিপ্ত্বা দৈবে তুষ্ণীং যবান্ বিকীর্য্য পিত্র্যে ওঁ অপহতেত্যাদি ব্রাহ্মণেন পঠিতে নমো নম ইতি তিলান্ বিকীর্য্য ব্রাহ্মণে জলগণ্ডূষং দত্ত্বা সপ্রণব ব্যাহৃতিকাং গায়ত্রীং ব্রাহ্মণেন পঠিতে নমো নম ইতি জপেৎ। ততোঽন্নে মধু দত্ত্বা তদভাবে গুড়ং দত্ত্বা ওঁ মধুবাতেত্যাদি ওঁ মধু মধু মধ্বিতি চ ব্রাহ্মণেন পঠিতে নমো নম ইতি জপেৎ। তত উত্তরামুখো বামোত্তরীয়ঃ পাতিত দক্ষিণজানুঃ অন্নং প্রোক্ষ্য ব্রাহ্মণে জলং দত্ত্বা বামহস্তেনান্নং ধৃত্বা নমঃ পুরূরবো মাদ্রবসৌ বিশ্বেদেবা এতদ্বো হন্নং সোপকরণং নম ইত্যুৎসৃজ্য দক্ষিণামুখো দক্ষিণোত্তরীয়ঃ পাতিত বামজানুঃ অন্নং প্রোক্ষ্য 
বাম হস্তেনান্নপাত্রং ধৃত্বা ব্রাহ্মণে জলং দত্ত্বা নমো হমুক গোত্র পিতামহামুক দত্ত দাস অমুক গোত্র প্রপিতামহামুক দত্ত দাস অমুক গোত্র বৃদ্ধপ্রপিতামহামুক দত্ত দাস এতত্তে হন্নং সোপকরণং নম ইত্যুৎসৃজেৎ। ততঃ প্রত্যেকং জলগণ্ডূষং দত্ত্বা প্রেতব্রাহ্মণপক্ষে তু ওঁ ইদং বিষ্ণুরিত্যাদি মধুজপান্তং কর্ম্ম ব্রাহ্মণেন মন্ত্রে পঠিতে নমো নম ইত্যুচ্চার্য্য কৃত্বাঽন্নং প্রোক্ষ্য বামহস্তেনান্নপাত্রং ধৃত্বা নমো হমুক গোত্র প্রেতামুক দত্ত দাস এতত্তেঽন্নং সোপকরণং নম ইত্যুৎসৃজেৎ। ততঃ সপ্রণব ব্যাহৃতিকাং গায়ত্রীং ত্রিঃ সকৃদ্বা ওঁ মধুবাতেত্যাদি ওঁ মধু মধু মধ্বিতি চ ওঁ অন্নহীনমিত্যাদি চ ব্রাহ্মণেন পঠিতে প্রত্যেকং নমো নম ইতি জপেৎ। ততঃ শ্রব্যং ব্রাহ্মণঃ পঠেৎ। তদ্যথা সপ্রণব ব্যাহৃতিকাং গায়ত্রীং ওঁ মধুবাতেত্যাদি

ত্র্যচং ওঁ মধু মধ্বিতি চ ওঁ যজ্ঞেশ্বরো হব্য সমস্তেত্যাদি ওঁ যোগীশ্বরমিত্যাদি যাজ্ঞবল্ক্যোক্ত শ্লোকত্রয়ং ওঁ তদ্বিষ্ণোরি-
ত্যাদি ওঁ দুর্য্যোধনোমন্যুময় ইত্যাদি ওঁ সপ্তব্যাধা ইত্যাদি চ ব্রাহ্মণেন পঠিতে নমো নম ইতি জপেৎ। ততো দক্ষিণাগ্রান্
কুশান্ ভূমৌ সংস্থাপ্য তান্ সতিল জলেন প্রোক্ষ্য সর্ব্ব প্রকারমন্নমুদ্ধৃত্য সতিলমেকীকৃত্য বারিণাপ্লুত্য ওঁ অগ্নিদগ্ধাশ্চে-
ত্যাদি ব্রাহ্মণেন পঠিতে নমো নম ইত্যুচ্চার্য্য তদ্ভুক্ত ফলমুদ্দিশ্য তিলপ্রোক্ষিত দর্ভোপরি বিকীরেৎ। ততো হস্তৌ প্রক্ষাল্যা-
চম্য দক্ষিণ শ্রবণং স্পৃষ্ট্বা বা হরিং স্মৃত্বা ব্রাহ্মণেভ্যঃ প্রত্যেকং জলগণ্ডূষং দত্ত্বা পূর্ব্ববদ্গায়ত্রীং ওঁ মধুবাতা ইত্যাদি ওঁ মধু
মধু মধ্বিতি চ ব্রাহ্মণেন পঠিতে নমো নম ইত্যুচ্চার্য্য নমঃ শেষমন্নং ক দেয়মিতি পৃচ্ছেৎ ওঁ ইষ্টেভ্যো দীয়তামিতি প্রতি-
বচনং। নমঃ পিণ্ড দানমহং করিষ্যে ইতি প্রশ্নং কুর্য্যাৎ ওঁ কুরুষ্বেতি প্রতিবচনং। ততো ব্রাহ্মণ সংমুখে ওঁ নিহন্মি সর্ব্ব-
মিত্যাদি ব্রাহ্মণেন পঠিতে নমো নম ইত্যুচ্চার্য্য নৈঋতীমারভ্য বামাবর্ত্তেন দক্ষিণাগ্রয়া জলরেখয়া চতুষ্কোণ মণ্ডলং কৃত্বা
বামহস্তাদ্দক্ষিণ হস্তেন সাগ্র কুশপত্রদ্বয়ং গৃহীত্বা তাভ্যাং ওঁ অপহতেত্যাদি ওঁ নিহন্মীত্যাদি চ ব্রাহ্মণেন পঠিতে নমো নম
ইত্যুচ্চার্য্য দক্ষিণাগ্রাং রেখাং কুর্য্যাৎ। ততঃ প্রেতপক্ষে পূর্ব্ববচ্চতুষ্কোণ মণ্ডলং কৃত্বা রেখাং কুর্য্যাৎ। ততঃ পিতামহাদি
পক্ষে রেখোপরি সমূলান্ সাগ্রান্ কুশানাস্তীর্য্য প্রেতপক্ষেপি কুশানাস্তীর্য্য ওঁ দেবতাভ্য ইত্যাদি ব্রাহ্মণেন পঠিতে নমো নম
ইতি জপেৎ। তত ওঁ অপহতেত্যাদি ব্রাহ্মণেন পঠিতে নমো নম ইতি সর্ব্বত্র তিলান্ বিকীরেৎ। ততঃ পিতামহাদিপক্ষে
বামহস্তাদ্দক্ষিণ হস্তেন সতিল পুষ্প জলং গৃহীত্বা নমো ঽমুক গোত্র পিতামহামুক দত্ত দাস অবনেনিক্ষ্ব নম ইত্যনেনাস্তীর্ণ

কুশোপরি দদ্যাৎ। এবং ক্রমেণ প্রপিতামহ বৃদ্ধপ্রপিতামহয়োরপি মধ্যাগ্রদেশয়ো র্দদ্যাৎ। ততঃ প্রেতপক্ষে নমোঽমুক গোত্র প্রেতামুক দত্ত দাস অবনেনিক্ষ্ব নম ইত্যনেনাস্তীর্ণ কুশোপরি দদ্যাৎ। ততোঽগ্নৌ করণশেষং শ্রাদ্ধশেষমন্নাদিকমেকস্মিন্ পাত্রে কৃত্বা পিণ্ডত্রয়ং নির্ম্মায় ঘৃত মধু তিলাভিঘারিতং কৃত্বা প্রত্যেকং জলস্পর্শপূর্ব্বকং বামহস্তগৃহীত পাত্রাদ্দক্ষিণ হস্তেন পিণ্ডং গৃহীত্বা প্রথমাস্তীর্ণ কুশমূলে নমো ঽমুক গোত্র পিতামহামুক দত্ত দাস এতত্তে পিণ্ডং নম ইতি বামহস্তান্বারব্ধ দক্ষিণহস্তেনাবনেজন স্থানে দদ্যাৎ। এবং প্রপিতামহ বৃদ্ধপ্রপিতামহয়োরপি। ততঃ আস্তীর্ণ কুশমূলে লেপভুজঃ পিতরঃ প্রীয়ন্তামিতি নিঘৃষ্য হস্তৌ প্রক্ষাল্যাচম্য হরিং স্মরেৎ। ততঃ প্রেতপক্ষে শ্রাদ্ধশেষান্ন ব্যঞ্জনাদিকমেকস্মিন্ পাত্রে কৃত্বা পিণ্ডং নির্ম্মায় ঘৃত মধু তিলাভিঘারিতং কৃত্বা বামহস্তগৃহীত পাত্রাদ্দক্ষিণ হস্তেন গৃহীত্বা নমো ঽমুক গোত্র প্রেতামুক দত্ত দাস এতত্তে পিণ্ডং নম ইতি বামহস্তান্বারব্ধ দক্ষিণ হস্তেন দদ্যাৎ। ততো ঽমন্ত্রকং করং প্রোঞ্ছ্যাচম্য হরিং স্মরেৎ। ততঃ পিতামহাদিপক্ষে ওঁ অত্র পিতরো মাদয়ধ্বমিতি ব্রাহ্মণেন পঠিতে নমো নমঃ ইত্যুচ্চার্য্য বামাবর্ত্তেনোদঙ্মুখো ভূত্বা গ্লানিপর্য্যন্তং শ্বাসং ধৃত্বা তেনৈব পথা পরাবর্ত্তমানঃ পিতামহাদীন্ ভাস্বরমূর্ত্তিকাংস্তুষ্টান্ ধ্যায়ন্ ওঁ অমীমদন্তঃ পিতরো যথাভাগমাবৃষায়িষত ইতি ব্রাহ্মণেন পঠিতে নমো নম ইত্যুচ্চার্য্য শ্বাসং ত্যজেৎ। ততঃ পূর্ব্বাবনেজনাবশিষ্ট জলেন নমো ঽমুক গোত্র পিতামহামুক দত্ত দাস প্রত্যবনেনিক্ষ্ব নম ইতি পিতামহপিণ্ডোপরি দদ্যাৎ। এবং প্রপিতামহ বৃদ্ধপ্রপিতামহয়োরপি। ততো নীবীং বিস্রংস্যাচম্য কৃতাঞ্জলিঃ। ওঁ নমো বঃ পিতরঃ শুষ্মায় ওঁ নমো বঃ পিতরস্তপসে ওঁ নমো বঃ পিতরো যজ্জীবস্তস্মৈ

ওঁ নমোবঃ পিতরো রসায় ওঁ নমোবঃ পিতরো ঘোরায় মন্যবে ওঁ স্বধায়ৈ বঃ পিতরো নম ইতি কাণ্বশাখিনাং গৌড়ীয়ানাং। ইতি ব্রাহ্মণেন পঠিতে নমো নম ইতি জপেৎ। ওঁ নমো বঃ পিতরো রসায় ওঁ নমো বঃ পিতরঃ শুষ্মায় ওঁ নমো বঃ পিতরো জীবায় ওঁ নমো বঃ পিতরঃ স্বধায়ৈ ওঁ নমো বঃ পিতরো ঘোরায় মন্যবে ইতি মাধ্যন্দিন্ শাখিনাং। বসন্তায়েত্যাদি ঋতু নমস্কার রূপে ব্রাহ্মণেন পঠিতে নমো নম ইত্যুক্ত্বা ওঁ নমো বঃ পিতর ইতি কব্যবাহনাদিরূপতয়া পিতৃনমস্কার রূপে ব্রাহ্মণেন পঠিতে নমো নম ইত্যুক্ত্বা ওঁ নমোবঃ পিতরো দত্তেতি ব্রাহ্মণেন পঠিতে নমো নম ইত্যুচ্চার্য্য পিতৄন্ বরং প্রার্থ্য ওঁ সদোবঃ পিতরো দেশ্ম ইতি ব্রাহ্মণেন পঠিতে পারিভাষিক দানমঙ্গীকৃত্য কৃতাঞ্জলির্নমো নম ইতি পঠেৎ। ইতি মাধ্যন্দিন্ শাখিনাং পাঠঃ। ততো নবমনবম্বা শুক্লবস্ত্র দশাভবং সূত্রং বামহস্তাদক্ষিণ হস্তেন গৃহীত্বা এতদ্বঃ পিতরো বাস ইতি ব্রাহ্মণেন পঠিতে নমো নম ইত্যুচ্চার্য্য নমো ঽমুক গোত্র পিতামহামুক দত্ত দাস এতত্তে বাসো নম ইতি দক্ষিণ হস্তেন পিতামহ পিণ্ডোপরি দদ্যাৎ। এবং প্রপিতামহ বৃদ্ধপ্রপিতামহয়োরপি। ততঃ প্রেতপক্ষে ওঁ অত্র প্রেত মাদয়স্ব যথা ভাগমাবৃষায়স্ব ইতি ব্রাহ্মণেন পঠিতে নমো নম ইত্যুচ্চার্য্য বামাবর্ত্তেনোদঙ্মুখো ভূত্বা গ্লানি পর্য্যন্তং শ্বাসং ধৃত্বা তেনৈব পথাপরাবর্ত্তমানঃ ওঁ অমীমদৎ প্রেতো যথা ভাগমাবৃষায়িষ্ট ইতি ব্রাহ্মণেন পঠিতে নমো নম ইতি দক্ষিণামুখো ভবন্ জপেৎ ততঃ প্রেতং পূর্ব্বাবনেজনাবিশিষ্ট জলেন নমোঽমুক গোত্র প্রেতামুক দত্ত দাস প্রত্যবনেনিক্ষ্ব নম ইতি প্রত্যবনে জপেৎ। ততো নীবীং বিস্রংস্যাচম্য হরিং স্মৃত্বা কৃতাঞ্জলিঃ পঠেৎ। ওঁ নমস্তে প্রেত শুষ্মায় ওঁ নমস্তে প্রেত তপসে ওঁ নমস্তে

প্রেত যজ্জীবন্তস্মৈ ওঁ নমস্তে প্রেত রসায় ওঁ নমস্তে প্রেত ঘোরায় মন্যবে ওঁ স্বধায়ৈ তে প্রেত নমঃ ইতি ব্রাহ্মণেন পঠিতে নমো নম ইত্যুচ্চার্য্য তাদৃশং সূত্রং বামহস্তাদ্দক্ষিণ হস্তেন গৃহীত্বা ওঁ এতদ্বঃ প্রেতাবাস ইতি ব্রাহ্মণেন পঠিতে নমো নম ইত্যুচ্চার্য্য নমো হমুক গোত্র প্রেতামুক দত্ত দাস এতত্তে বাসো নম ইতি পিণ্ডোপরি দদ্যাৎ। ততঃ প্রেতপিণ্ডং সংপূজ্য সূত্রগন্ধাদীনপসার্য্য ওঁ যে সমানা ইতি মন্ত্রদ্বয়ং ব্রাহ্মণেন পঠিতে নমো নম ইত্যুচ্চার্য্য সুবর্ণ রজত কুশৈশ্ছেদদ্বয়েন সমাংশেন প্রেতপিণ্ডং খণ্ডত্রয়ং কৃত্বা আদ্যখণ্ডং পিতামহপিণ্ডে স্থাপয়িত্বা ওঁ যে সমানা ইতি মন্ত্রদ্বয়ং ব্রাহ্মণেন পঠিতে নমো নম ইত্যুচ্চার্য্য মিশ্রয়িত্বা তত্রৈব স্থাপয়েৎ এবং মধ্যখণ্ডং প্রপিতামহপিণ্ডে শেষখণ্ডং বৃদ্ধপ্রপিতামহপিণ্ডে মিশ্রয়েৎ। তত-স্তান্ বর্ত্তুলান্ কৃত্বা গন্ধাদিনা সংপূজ্য ওঁ সুসংপ্রোক্ষিতমস্ত্বি ব্রাহ্মণেন পঠিতে নমো নম ইত্যুচার্য্য ব্রাহ্মণাগ্র ভূমিং সিঞ্চেৎ। ওঁ অস্ত্বিতি প্রতিবচনং। ততো দৈব পূর্ব্বকং প্রত্যেকং ওঁ শিবা আপঃ সন্ত্বিতি ব্রাহ্মণেন পঠিতে নমো নম ইতি ব্রাহ্মণে জলং দদ্যাৎ। ওঁ সন্ত্বিতি প্রতিবচনং। ওঁ সৌমনস্যমস্ত্বিতি ব্রাহ্মণেন পঠিতে নমো নম ইত্যুচ্চার্য্য পুষ্পং দদ্যাৎ ওঁ অস্ত্বিতি প্রতিবচনং। ওঁ অক্ষতঞ্চারিষ্টঞ্চাস্ত্বিতি ব্রাহ্মণেন পঠিতে নমো নম ইত্যুচ্চার্য্যাক্ষতান্দদ্যাৎ। অস্ত্বিতি প্রতিবচনং। ততঃ প্রেতপক্ষে এবং দত্ত্বা পিতামহ পক্ষে তিলাজ্যমধু সংযুক্ত জলং গৃহীত্বা নমো হমুক গোত্রস্য পিতামহ-স্যামুক দত্ত দাসস্য দত্তমিদমন্নপানাদিক মক্ষয্যমস্ত্বিতি দদ্যাৎ। ওঁ অস্ত্বিতি প্রতিবচনং। এবং প্রপিতামহ বৃদ্ধপ্রপিতা-মহয়োরপি দদ্যাৎ। ততঃ প্রেতপক্ষে তাদৃশং জলং গৃহীত্বা নমো হমুক গোত্রস্য প্রেতস্যামুক দত্ত দাসস্য দত্তমিদমন্ন পানা-

দিকমুপতিষ্ঠতামিতি দদ্যাৎ। ওঁ উপতিষ্ঠতামিতি প্রতিবচনং। ততঃ পিতামহপক্ষে ওঁ অঘোরাঃ পিতরঃ সন্ত্বিতি ব্রাহ্মণেন
পঠিতে নমো নম ইত্যুক্ত্বা প্রার্থয়েৎ। ওঁ সন্ত্বিতি প্রতিবচনং। ওঁ গোত্রং নো বর্দ্ধতামিতি ব্রাহ্মণেন পঠিতে নমো নম ইতি জপেৎ
ওঁ বর্দ্ধতামিতি প্রতিবচনং। ততঃ প্রাঞ্জলিঃ সুমনাস্তন্মনা ভূত্বা দক্ষিণাং দিশং পশ্যন্ বরং যাচেত ওঁ দাতারো নোঽভি বর্দ্ধন্তামিত্যাদি
এতাঃ সত্যা আশিষঃ সন্ত্বিত্যন্তং ব্রাহ্মণেন পঠিতে নমো নম ইতি জপেৎ। ওঁ সন্ত্বিতি প্রতিবচনং। ততঃ প্রেতপক্ষে ওঁ অঘোরঃ
প্রেতো ঽস্ত্বিতি ব্রাহ্মণেন পঠিতে নমো নম ইতি জপেৎ। ওঁ অস্ত্বিতি প্রতিবচনং। ওঁ গোত্রং নো বর্দ্ধতামিতি ব্রাহ্মণেন
পঠিতে নমো নম ইতি জপেৎ। ওঁ বর্দ্ধতামিতি প্রতিবচনং। ততঃ সপবিত্র কুশান্ পিতামহাদি পিণ্ডত্রয়োপর্য্যাস্তীর্য্য
নমঃ স্বধাং বাচয়িষ্যে ইতি ব্রাহ্মণং প্রার্থয়েৎ ওঁ বাচ্যতামিতি প্রতিবচনং। ওঁ পিতামহেভ্যঃ স্বধোচ্যতাং ওঁ প্রপিতামহেভ্যঃ ৪৭১
স্বধোচ্যতাং ওঁ বৃদ্ধপ্রপিতামহেভ্যঃ স্বধোচ্যতাং ইতি ব্রাহ্মণেন পঠিতে প্রত্যেকং নমো নম ইতি জপ্ত্বা পিণ্ডোপরি প্রত্যেকং
জলং দদ্যাৎ ওঁ অস্তু স্বধেতি প্রতি বচনং। ততঃ সর্ব্বত্র পিণ্ডোপরি বারিধারয়া ওঁ ঊর্জ্জং বহন্তীরিত্যাদি ব্রাহ্মণেন পঠিতে
নমো নম ইত্যনেন সিঞ্চেৎ। ততঃ পিণ্ডানুত্তোল্যাঘ্রায় স্বস্থানাৎ স্থানান্তরে স্থাপয়েৎ। ততো ন্যুব্জপাত্রামুত্তানীকৃত্য পিতা-
মহাদি পক্ষে নমো ঽদ্যেত্যাদি অমুক গোত্রস্য পিতামহস্যামুক দত্ত দাসস্যামুক গোত্রস্য প্রপিতামহস্যামুক দত্তদাসস্যামুক গোত্রস্য
বৃদ্ধ প্রপিতামহস্যামুক দত্ত দাসস্য কৃতৈতৎ পার্ব্বণবিধিক শ্রাদ্ধপ্রতিষ্ঠার্থং দক্ষিণামিদং রজতং তন্মূল্যং বা বিষ্ণু দৈবতং
যথানাম গোত্রায় ব্রাহ্মণায়াহং দদানীতি দক্ষিণাং দদ্যাৎ। ততঃ প্রেতপক্ষে নমো ঽদ্যেত্যাদি অমুক গোত্রস্য প্রেতস্যামুক দত্ত

সামস্য কৃতৈতৎ সপিণ্ডীকরণৈকোদ্দিষ্ট শ্রাদ্ধ প্রতিষ্ঠার্থং দক্ষিণামিদং রজতং তন্মূল্যং বা বিষ্ণুদৈবতং যথানাম গোত্রায় ব্রাহ্মণায়াহং দদানীতি দক্ষিণাং দদ্যাৎ। ততো দেবপক্ষে উত্তরামুখোপবীতী পাতিত দক্ষিণজানুঃ। নমো হদ্যেত্যাদি পুরূরবো মাদ্রবসোর্ব্বিশ্বেষাং দেবানাং কৃতৈতৎ পার্ব্বণ বিধিক শ্রাদ্ধপ্রতিষ্ঠার্থং দক্ষিণামিদং কাঞ্চনং তন্মূল্যং বা বিষ্ণুদৈবতং যথানাম গোত্রায় ব্রাহ্মণায়াহং দদানীতি দক্ষিণাং দদ্যাৎ। তত ওঁ বিশ্বেদেবাঃ প্রীয়ন্তামিতি ব্রাহ্মণেন পঠিতে নমো নম ইতি জপেৎ। ওঁ প্রীয়ন্তামিতি প্রতিবচনং। তত ওঁ দেবতাভ্য ইত্যাদি ব্রাহ্মণেন ত্রিঃ পঠিতে নমো নম ইতি জপেৎ। ততঃ প্রেতপক্ষে ওঁ দেবতাভ্য ইতি পাঠানন্তরং নমো নম ইতি জপেৎ। ততঃ পিতামহপক্ষে ওঁ বাজে হবাজে ইত্যাদি ব্রাহ্মণেন পঠিতে নমো নম ইত্যনেন কুশাগ্রেণ ব্রাহ্মণস্থান্ পিতৄন্ বিসৃজ্য পশ্চাদ্ব্রাহ্মণস্থান্ দেবান্ কুশাগ্রেণ উপবীতী বিসর্জ্জয়েৎ। তত ওঁ আ মা বাজস্যেত্যাদি ব্রাহ্মণেন পঠিতে নমো নম ইত্যুচ্চার্য্য প্রদক্ষিণবারিধারয়া বেষ্টয়ন্ প্রণমেৎ। ততঃ প্রেতপক্ষে ওঁ অভিরম্যতামিতি ব্রাহ্মণেন পঠিতে নমো নম ইতি জপ্ত্বা বিসর্জ্জয়েৎ। অভিরতো হস্মীতি প্রতিবচনং। ততঃ পিণ্ডান্ গো হজ বিপ্রেভ্যো দদ্যাৎ জলে বা ক্ষিপেৎ। ততো বামদেব্যং ব্রাহ্মণেন ত্রিঃ পঠিতে নমো নম ইতি বদেৎ। ততো দক্ষিণ পাণিনা দীপমাচ্ছাদ্য হস্তৌ প্রক্ষাল্যাচম্য এতৎ কর্ম্মাচ্ছিদ্রমস্ত্বিতি বদেৎ। ওঁ অস্ত্বিতি প্রত্যুক্তে নমো হদ্যেত্যাদি এতৎ শ্রাদ্ধবৈগুণ্য সমাধানার্থং বিষ্ণুস্মরণমহং করিষ্যে ইতি সঙ্কল্প্য ওঁ তদ্বিষ্ণোরিত্যাদি ব্রাহ্মণেন পঠিতে নমো নম ইত্যুচ্চার্য্য বিষ্ণুং স্মরেৎ ॥ * ॥ * ॥ * ॥ * ॥ ৪৭২

অথ নান্দীমুখশ্রাদ্ধপ্রয়োগঃ। সুস্নাতঃ কৃতনিত্যক্রিয়ঃ প্রাঙ্মুখঃ প্রক্ষালিতপাণিপাদঃ গোময়োপলিপ্তে দেশে আবৃতে
উদঙ্মুখ আসনোপবিষ্টস্তিলতৈলেন দীপং প্রজ্বাল্য ওঁ তৎ সদিতি ব্রাহ্মণেনোক্তে নমো নম ইত্যুচ্চার্য্য দর্ভত্রয় ফলজলসহিতং
তাম্রপাত্রমাদায় নমো হদ্যামুকে মাসি অমুকে পক্ষে হমুক তিথৌ অমুক গোত্রস্য শ্রী অমুক দত্ত দাসস্যামুক কর্ম্মাভ্যুদয়ার্থং সগণা-
ধিপ গৌর্য্যাদি ষোড়শমাতৃকাপূজা বসোর্ধারা সম্পাতনায়ুষ্যসূক্তজপাভ্যুদয়িক শ্রাদ্ধান্যহঙ্করিষ্যে ইত্যাচারাৎ সঙ্কল্পয়েৎ।
স্বীয়কর্ম্মণি তু অমুক গোত্রস্যেত্যাদাবমুক গোত্র ইত্যাদি প্রয়োগঃ। তত্র সপ্তদশ যবপুঞ্জেষু প্রত্যেকং গণপতি গৌরী পদ্মা
শচী মেধা সাবিত্রী বিজয়া জয়া দেবসেনা স্বধা স্বাহা শান্তি পুষ্টি ধৃতি তুষ্টি আত্মদেবতা কুলদেবতাঃ পূজয়েৎ। নমো গণপতে
ইহা গচ্ছ ইহ তিষ্ঠেত্যাবাহ্য পাদ্যার্ঘ্যাচমনীয় গন্ধপুষ্প ধূপদীপ নৈবেদ্য গন্ধপুষ্পাভ্যাং বা এতৎ পাদ্যং নমো গণপতয়ে নম
ইত্যনেন পূজয়েৎ। গৌর্য্যাদি পূজনে তু নমো গৌরি মাতরিহাগচ্ছেত্যাদিক্রমেন মাতৃপদপ্রয়োগেন পূজয়েৎ। সর্ব্বত্র
ক্ষমস্বেতি বিসর্জ্জয়েৎ। ততো গোময়োপলিপ্তভিত্তৌ প্রাঙ্মুখ উদঙ্মুখো বা উপবিশ্য ওঁ বসোঃ পবিত্রমসি শতধারং বসোঃ
পবিত্রমসি সহস্রধারং দেবস্ত্বা সবিতা পুনাতু বসোঃ পবিত্রেণ শতধারেণ সুপ্তা কাম ধুক্ষ্ব ইতি ব্রাহ্মণেন পঠিতে নমো নম
ইত্যুচ্চার্য্য ঘৃতেন সপ্তধারা দদ্যাৎ। তত আয়ুষ্যাণি ব্রাহ্মণদ্বারা জপেৎ। যথা আয়ুর্বিশ্বায়ুর্বিশ্বং বিশ্বমায়ুরসীমহি প্রজাস্ত-
ষ্টুরধিনিধেহ্য শেচ শতং জীবেম শরদোবয়ন্তে। ওঁ আয়ুষে মে পবস্ব বর্চ্চসে পবস্ব পরশু বিভুস্তং পৃথিব্যা দিবো জনিত্র্যা
শৃণ্বন্তাপোহধঃ ক্ষরন্তী সোমে হোদ্মায় মমায়ুষে মম ব্রহ্মবর্চ্চসায় যজমানস্যর্দ্ধ্যা অমুষ্য রাজ্যায়। ইতি ব্রাহ্মণেন পঠিতে নমো

নম ইতি জপেৎ। অমুষ্য স্থানে যদর্থং বৃদ্ধিস্তস্য ষষ্ঠ্যন্তং নাম প্রয়োজ্যং। তত আচম্য নমো বাস্তুপুরুষায় নম ইতি বাস্তুং সংপূজ্য ওঁ তদ্বিষ্ণোরিত্যাদি ব্রাহ্মণেন পঠিতে নমো নম ইত্যনেন বিষ্ণুং স্মৃত্বা যজ্ঞেশ্বরং সংপূজ্য শ্রাদ্ধীয়াগ্রভাগং দদ্যাৎ। অত্র সর্ব্বত্রোদঙ্মুখো বামোত্তরীয়ঃ পাতিত দক্ষিণজানুঃ ঋজুদর্ভত্রয়েণ যবোদকেন কর্ম্ম কুর্য্যাৎ। পরভূমৌ তু এতদন্নং নম এতদ্ভূস্বামি পিতৃভ্যো নম ইতি দত্ত্বা দর্ভবটুনুপবেশয়েৎ। তত্র ক্রমঃ। পশ্চিম দিশি নৈর্ঋত কোণে দেবানাং তদুত্তরে মাতৃণাং তদুত্তরে পিতৃণাং তদুত্তরে মাতামহানামাসনানি প্রাগগ্রদর্ভদ্বয়যুক্তানি পরিকল্প্য দক্ষিণাবর্ত্তেন কর্ম্ম কুর্য্যাৎ। ততো দৈবে জলগণ্ডূষং দত্ত্বা নমো ঽদ্যামুকে মাস্যমুক পক্ষে ঽমুক তিথৌ অমুক গোত্রস্য শ্রী অমুক দত্ত দাসস্যামুক কর্ম্মাভ্যুদয়ার্থং অমুক গোত্রায়া নান্দীমুখ্যা মাতুরমুকী দাস্যা অমুক গোত্রায়া নান্দীমুখ্যাঃ পিতামহ্যা অমুকী দাস্যা অমুক গোত্রায়া নান্দীমুখ্যাঃ প্রপিতামহ্যা অমুকী দাস্যা অমুক গোত্রস্য নান্দীমুখস্য পিতুরমুক দত্ত দাসস্যামুক গোত্রস্য নান্দীমুখস্য পিতামহস্যামুক দত্ত দাসস্য অমুক গোত্রস্য নান্দীমুখস্য প্রপিতামহস্যামুক দত্ত দাসস্যামুক গোত্রস্য নান্দীমুখস্য মাতামহস্যামুক গুপ্ত দাসস্যামুক গোত্রস্য নান্দীমুখস্য প্রমাতামহস্যামুক গুপ্ত দাসস্যামুক গোত্রস্য নান্দীমুখস্য বৃদ্ধপ্রমাতামহস্যামুক গুপ্ত দাসস্যাভ্যুদয়িক শ্রাদ্ধে কর্ত্তব্যে বসুসত্যয়োর্বিশ্বেষাং দেবানাং আভ্যুদয়িক শ্রাদ্ধং দর্ভময় ব্রাহ্মণয়োরহঙ্করিষ্যে ওঁ কুরুষ্বেতি প্রতিবচনং। স্বীয় কর্ম্মণি তু নিজ গোত্র নাম প্রথমান্তেন প্রয়োক্তব্যং। ততো মাতৃপক্ষে জলগণ্ডূষং দত্ত্বা নমো ঽদ্যামুকে মাস্যমুক পক্ষে অমুক তিথৌ অমুক গোত্রস্য শ্রী অমুক দত্ত দাসস্যামুক কর্ম্মাভ্যুদয়ার্থং অমুক গোত্রায়া নান্দীমুখ্যা

মাতুরমুকী দাস্যা অমুক গোত্রায়া নান্দীমুখ্যাঃ পিতামহ্যা অমুকী দাস্যা অমুক গোত্রায়া নান্দীমুখ্যাঃ প্রপিতামহ্যা অমুকী দাস্যা আভ্যুদয়িক শ্রাদ্ধং দর্ভময় ব্রাহ্মণয়োরহং করিষ্যে ওঁ কুরুষ্বেতি প্রতিবচনং। এবং লিঙ্গোহেন পিতৃপক্ষমাতামহ পক্ষয়োরপি। ততঃ সপ্রণব ব্যাহৃতিকাং গায়ত্রীং ওঁ দেবতাভ্য ইত্যাদি চ ব্রাহ্মণেন পঠিতে নমো নম ইত্যুচ্চার্য্য পুণ্ডরীকাক্ষং স্মৃত্বা যবজ্জলেন শ্রাদ্ধীয় দ্রব্যাণি প্রোক্ষ্য রক্ষার্থমুদক পাত্রমেক দেশে স্থাপয়েৎ। ততো দেবপক্ষে ব্রাহ্মণহস্তে জলং দত্ত্বা নমো বসুসত্যৌ বিশ্বে দেবা এতদ্বঃ কুশাসনং নম ইতি ঋজু দর্ভান্ দেবব্রাহ্মণ দক্ষিণ পার্শ্বে দদ্যাৎ। ততো মাতৃপক্ষে ব্রাহ্মণে জলং দত্ত্বা নমো ঽমুক গোত্রে নান্দীমুখি মাতরমুকী দাসি অমুক গোত্রে নান্দীমুখি পিতামহি অমুক দাসী অমুক গোত্রে নান্দীমুখি প্রপিতামহি অমুকী দাসি এতত্তে দর্ভাসনং নমঃ। ততঃ পিতৃপক্ষে ব্রাহ্মণে জলং দত্ত্বা নমোঽমুক গোত্র নান্দীমুখ পিতরমুক দত্ত দাস অমুক গোত্র নান্দীমুখ পিতামহামুক দত্ত দাস অমুক গোত্র নান্দীমুখ প্রপিতামহ অমুক দত্ত দাস এতত্তে দর্ভাসনং নমঃ। এবং মাতামহ পক্ষেপি। ততো দৈবে যবান্ গৃহীত্বা নমো বিশ্বান্ দেবানাবাহয়িষ্যে ইতি পৃচ্ছেৎ ওঁ আবাহয়েত্যুত্তরং। ওঁ বিশ্বে দেবা স আগত শৃণুতা ম ইমং হবং এদং বর্হির্নিষীদত ইতি ব্রাহ্মণেন পঠিতে নমো নম ইত্যুচ্চার্য্যাবাহ্য তুষ্ণীং যবান্ বিকীরেৎ। তত ওঁ বিশ্বে দেবাঃ শৃণুতেমং হবং যে মে ঽন্তরীক্ষে য উপদ্যবিষ্ঠ যে অগ্নিজিহ্বা উত বা যজত্রা আসাদ্যাস্মিন্ বর্হিসি মাদয়ধ্বং ইতি ব্রাহ্মণেন পঠিতে কৃতাঞ্জলির্নমো নম ইত্যুচ্চার্য্য নমো নান্দীমুখান্ পিতৃনাবাহয়িষ্যে ইতি পৃচ্ছেৎ ওঁ আবাহয়েত্যনুজ্ঞাতঃ ওঁ উশন্তস্ত্বা নিধীমহ্যুশন্তঃ সমিধীমহি উশন্নুশতং আবহ

নান্দীমুখান্ হবিষে অত্তবে ইতি ব্রাহ্মণেন পঠিতে নমো নম ইত্যাবাহ্য ওঁ আয়ান্তু নো নান্দীমুখাঃ পিতরঃ সোম্যাসো ঽগ্নিস্বাত্তাঃ পথিভির্দেবযানৈরস্মিন্ যজ্ঞে পুষ্ট্যা মদন্তোঽধিব্রুবন্তু তে ঽবন্ত্বস্মানিতি ব্রাহ্মণেন পঠিতে নমো নম ইত্যুচ্চার্য্য ওঁ অপহতেত্যাদি ব্রাহ্মণেন পঠিতে নমো নম ইতি জপেৎ। ততো জলং স্পৃষ্ট্বা দৈবে উত্তরাগ্র কুশোপরি মাত্রাদি পক্ষে পূর্ব্বাগ্র কুশোপরি দশ পাত্রাণি সংস্থাপ্য ওঁ পবিত্রে স্থো বৈষ্ণব্যাবিতি ব্রাহ্মণেন পঠিতে নমো নম ইত্যুচ্চার্য্যা-নখছিন্নং ওঁ বিষ্ণোর্মনসা পূতে স্থ ইতি ব্রাহ্মণেন পঠিতে নমো নম ইত্যনেন প্রোক্ষিতং পবিত্রমেকৈকস্মিন্ পাত্রে একৈকং বিন্যস্য ওঁ শন্নোদেবীরভিষ্টয়ে আপো ভবন্তু পীতয়ে শংযোরভি স্রবন্তু ন ইতি ব্রাহ্মণেন পঠিতে নমো নম ইত্যুচ্চার্য্য দৈবাদি ক্রমেণ জলং দদ্যাৎ। ততো দৈবে ওঁ যবোসি যবয়াস্মদ্দ্বেষো যবয়ারাতীরিতি ব্রাহ্মণেন পঠিতে নমো নম ইত্যু-চ্চার্য্য যবান্ বিকীরেৎ। মাত্রাদি পক্ষেষু ওঁ যবোসি সোম দেবত্যো গোসবো দেবনির্ম্মিতঃ প্রত্নমদ্ভিঃ পৃক্ত পুষ্ট্যা নান্দী-মুখান্ পিতৃন্ লোকান্ প্রীণাহি নঃ স্বাহেতি ব্রাহ্মণেন পঠিতে নমো নম ইত্যুচ্চার্য্য প্রত্যেকং যবান্ দদ্যাৎ। সর্ব্বত্র মন্ত্রপাঠঃ। ততো দৈবাদি ক্রমেণ তূষ্ণীং গন্ধপুষ্পে দত্ত্বা নমোঽচ্ছিদ্রান্যর্ঘ্যপাত্রাণি সন্ত্বিত্যবধারয়েৎ। ওঁ সন্ত্বিতি প্রত্যুক্তে দৈবাদি ব্রাহ্মণেষু প্রাগগ্রাণি পবিত্রাণি দত্ত্বা পুষ্পান্তরেণ দত্ত্বা জলান্তরঞ্চ শিরঃ প্রভৃতি সর্ব্ব গাত্রেভ্যো নম ইতি পূজয়েৎ। ততো দৈবপাত্রং বামহস্তে ধৃত্বা দক্ষিণ হস্তেনাচ্ছাদ্য ওঁ যা দিব্যা ইত্যাদি ব্রাহ্মণেন পঠিতে নমো নম ইত্যুচ্চার্য্য নমো বসু সত্যো বিশ্বে দেবা এষ বো ঽর্ঘ্য নম ইতি ব্রাহ্মণহস্তে দদ্যাৎ। ততো মাত্রাদি পক্ষে ঽর্ঘপাত্রং ধৃত্বা ওঁ যা দিব্যা

ইত্যাদি ব্রাহ্মণেন পঠিতে নমো নম ইত্যুচ্চার্য্য নমো হমুক গোত্রে নান্দীমুখি মাতরমুকী দাসি এষ তে হর্ঘ্যো নম ইতি ব্রাহ্মণে দত্ত্বা সংস্রব জলসহিত পাত্রং তত্রৈব স্থাপয়েৎ। এবং প্রত্যেকং জলং স্পৃষ্ট্বা পিতামহ্যাদ্যস্টভ্যো যথাযথমর্ঘ্যং দত্ত্বা সংস্রব জলসহিত পাত্রাণি যথাস্থানং সংস্থাপ্য পিতৃপাত্রে মাত্রাদিপাত্রস্থ জলং সংস্থাপ্য প্রপিতামহপাত্রেণ পিধায় কর্ত্তুর্ব্বামপার্শ্বে সমূলদর্ভে তৎসংস্রবসহিত পাত্রং ওঁ নান্দীমুখেভ্যঃ পিতৃভ্যঃ স্থানমসীতি ব্রাহ্মণেন পঠিতে নমো নম ইত্যনেন ন্যুব্জং কুর্য্যাৎ। ততো দেবপক্ষে নমো বসুসত্যৌ বিশ্বেদেবা এতানি বো গন্ধ পুষ্প ধূপ দীপাচ্ছাদনানি নম ইত্যুৎসৃজ্য এষ বো গন্ধঃ এতদ্বঃ পুষ্পং এষ বো ধূপঃ এষ বো দীপঃ এতদ্ব আচ্ছাদনমিত্যনেন নিবেদয়েৎ। ততো মাত্রাদি পক্ষে প্রদক্ষিণক্রমেণ নমো হমুক গোত্রে নান্দীমুখি মাতরমুকী দাসী অমুক গোত্রে নান্দীমুখি পিতামহি অমুকী দাসি অমুক 
গোত্রে নান্দীমুখি প্রপিতামহি অমুকী দাসি এতানি তে গন্ধপুষ্প ধূপ দীপাচ্ছাদনানি নম ইত্যুৎসৃজ্য এষ তে গন্ধঃ এতত্তে পুষ্পং এষ তে ধূপঃ এষ তে দীপঃ এতত্তে আচ্ছাদনমিতি নিবেদয়েৎ। এবং পিতৃপক্ষমাতামহপক্ষয়োরপি লিঙ্গোহেন ততো দৈবাদি ক্রমেণ ব্রাহ্মণাগ্রস্থিতং কুশাদিকমপনীয় ঐশানীমারভ্য দক্ষিণাবর্ত্তয়া জলরেখয়া চতুষ্কোণ মণ্ডলং কৃত্বা দৈবাদি-ক্রমেণ ভোজনপাত্রাণি সংস্থাপ্য সঘৃতমন্নমাদায় অগ্নৌ করিষ্যে ইতি ব্রাহ্মণং পৃচ্ছেৎ ওঁ কুরুষ্বেতি প্রতিবচনং ওঁ অগ্নয়ে কব্যবাহনায় স্বাহা ইতি ব্রাহ্মণেন পঠিতে নমো নম ইত্যুচ্চার্য্য জলে আহুতিং দদ্যাৎ। ওঁ সোমায় পিতৃমতে স্বাহা ইতি ব্রাহ্মণেন পঠিতে নমো নম ইত্যুচ্চার্য্যাপরাহুতিং দদ্যাৎ। ততো দৈবপাত্রে বারদ্বয়ং মাত্রাদি পক্ষ পাত্রে বারত্রয়ং

প্রত্যেকং দত্ত্বা পিণ্ডার্থং কিঞ্চিৎ স্থাপয়েৎ। ততো দৈবপাত্রমনুত্তান হস্তাভ্যাং ধৃত্বা ওঁ পৃথিবী তে পাত্রমিত্যাদি ব্রাহ্ম-
ণেন পঠিতে নমো নম ইতি জপেৎ। ততো মাত্রাদি পক্ষে অনুত্তান হস্তাভ্যাং ধৃত্বা এবং কৃত্বা দৈবাদিক্রমেণান্নাদিকং
যথা সম্ভবং দ্রাক্ষামলক মূলানি দধি মধু বদরাণি চ পাত্রান্তরিত হস্তাভ্যাং পত্নী স্বয়ং বা পরিবেশয়েৎ। সীসকায়স পাযা-
ণাষ্টাঙ্গুলন্যূন ভগ্ন পাত্রাণি বর্জ্জয়েৎ। ভগ্নমপি তাম্রপাত্রং গ্রাহ্যং রজতপাত্রং স্বল্পমপি কুষ্মাণ্ডালাবু বার্ত্তাকী পালকী
রাজিকা দ্বিঃ স্বিন্নাদিকং বর্জ্জয়েৎ। তত ওঁ ইদং বিষ্ণুরিত্যাদি ব্রাহ্মণেন পঠিতে নমো নম ইত্যুচ্চার্য্যানখমঙ্গুষ্ঠং ক্ষিপেৎ।
দৈবে তুষ্ণীং যবান্ বিকীর্য্য মাত্রাদিপক্ষে ওঁ অপহতেত্যাদি ব্রাহ্মণেন পঠিতে নমো নম ইতি যবান্ বিকীর্য্যান্নে মধু দত্ত্বা
তদভাবে গুড়ং দত্ত্বা সপ্রণব ব্যাহৃতিকাং গায়ত্রীং ওঁ মধু মধু মধ্বিতি চ ব্রাহ্মণেন পঠিতে নমো নম ইতি জপেৎ। ততো ৪৭৯
নমো বসু সত্যৌ বিশ্বে দেবা এতদ্বোঽন্নং সোপকরণং নম ইত্যুৎসৃজেৎ। ততো মাত্রাদিপক্ষে মধুজপান্তঃ কর্ম্ম কৃত্বা
ঋজু কুশত্রয়েণ নমো ঽমুক গোত্রে নান্দীমুখি মাতরমুকী দাসি অমুক গোত্রে নান্দীমুখি পিতামহি অমুকী দাসি অমুক গোত্রে
নান্দীমুখি প্রপিতামহি অমুকী দাসি এতত্তেঽন্নং সোপকরণং নম ইত্যুৎসৃজেৎ। পিতৃপক্ষ মাতামহপক্ষয়োরপি লিঙ্গো-
হেন। ততঃ প্রত্যেকং জলগণ্ডূষং দত্ত্বা সপ্রণব ব্যাহৃতিকাং গায়ত্রীং ত্রিঃ সকৃদ্বা ওঁ মধু মধু মধ্বিতি চ ওঁ অন্নহীনমি-
ত্যাদি চ ব্রাহ্মণেন পঠিতে নমো নম ইতি জপেৎ। ততঃ শ্রাব্যং ব্রাহ্মণঃ পঠেৎ। তদ্যথা। সপ্রণব ব্যাহৃতিকাং গায়ত্রীং
ওঁ মধুবাতা ইত্যাদিত্র্যচং মধু মধু মধ্বিতি চ ওঁ যজ্ঞেশ্বর ইত্যাদি ওঁ যোগীশ্বরমিত্যাদি যাজ্ঞবল্ক্যোক্ত শ্লোকত্রয়ং ওঁ তদ্বিষ্ণোরিত্যাদি

ওঁ দুর্য্যোধন ইত্যাদি ভারতীয় শ্লোকদ্বয়ং ওঁ সপ্তব্যাধা ইত্যাদি চ ওঁ সোমং রাজানং বরুণমগ্নি মন্বারভামহে আদিত্যং বিষ্ণুং রুদ্রং ব্রহ্মাণঞ্চ বৃহস্পতিমিতি চ ব্রাহ্মণেন পঠিতে নমো নম ইতি জপেৎ। ততঃ সযবমন্নং গৃহীত্বা প্রাগগ্র কুশোপরি ওঁ অগ্নিদগ্ধাশ্চেত্যাদি মন্ত্রদ্বয়ে ব্রাহ্মণেন পঠিতে নমো মম ইত্যুচ্চার্য্য তদুক্ত ফলমুদ্দিশ্য বিকীরেৎ। ততো হস্তৌ প্রক্ষাল্যা-চম্য দক্ষিণ শ্রবণং স্পৃষ্ট্বা বা হরিং স্মৃত্বা ব্রাহ্মণেষু প্রত্যেকং জলগণ্ডূষং দত্ত্বা পূর্ব্ববদ্গায়ত্রীং মধুবাতা ইত্যাদিকং ওঁ মধু মধু মধ্বিতি চ ব্রাহ্মণেন পঠিতে নমো নম ইতি জপেৎ। ততো নমঃ শেষমন্নং ক্বদেয়মিতি পৃচ্ছেৎ ওঁ ইষ্টেভ্যো দীয়তা-মিতি প্রতিবচনং। নমঃ পিণ্ডদানমহং করিষ্যে ইতি প্রশ্নং কুর্য্যাৎ। ওঁ কুরুষ্বেতি প্রতিবচনং। উত্তরামুখঃ ওঁ নিহন্মি সর্ব্ব-মিত্যাদি ব্রাহ্মণেন পঠিতে নমো নম ইত্যুচ্চার্য্য দক্ষিণাবর্ত্তেন জলরেখয়া নৈর্ঋতীমারভ্য চতুষ্কোণ মণ্ডলং কৃত্বা তদ্দক্ষিণত ৪৭৯
স্তথাবিধমপরমণ্ডলদ্বয়ং কৃত্বা প্রাদেশমাত্রং সাগ্রকুশপত্রদ্বয়ং বামহস্তাদ্দক্ষিণ হস্তেন গৃহীত্বা বামহস্তান্বারব্ধ দক্ষিণ পাণিনা মধ্যস্থানে উত্তরাগ্র রেখাত্রয়ং ওঁ অপহতেত্যাদি ওঁ নিহন্মীত্যাদি চ ব্রাহ্মণেন পঠিতে নমো নম ইত্যুচ্চার্য্য কৃত্বা তদ্দর্ভদ্বয়-মুত্তরস্যাং দিশি ক্ষিপেৎ। রেখোপরি সমূলান্ সাগ্রানুত্তরাগ্রান্ কুশানাস্তীর্য্য ওঁ দেবতাভ্য ইতি ব্রাহ্মণেন ত্রিঃ পঠিতে নমো নম ইত্যুচ্চার্য্য বামহস্তেন সযব পুষ্পজলং গৃহীত্বা বামহস্তাদ্দক্ষিণহস্তেন সংগৃহ্য নমো ঽমুক গোত্রে নান্দীমুখি মাতর-মুকী দাসি অবনেনিক্ষ্ব নম ইত্যনেন কুশমূলে দদ্যাৎ। এবং জলস্পর্শ পূর্ব্বকং পিতামহ্যাদ্যষ্টভ্যো মধ্যাগ্রক্রমেণাস্তীর্ণ কুশমূলে দদ্যাৎ। এবং পিত্রাদি পক্ষে লিঙ্গোহঃ। ততোঽগ্নৌ করণশেষং শ্রাদ্ধশেষান্নঞ্চ যবমধ্বাজ্যযুক্তমেকস্মিন্

পাত্রে নবপিণ্ডান্নির্ম্মায় ঘৃতমধ্বভিঘারিতান্ কৃত্বা একং পিণ্ডং বামহস্তগৃহীতপাত্রাদ্দক্ষিণ হস্তেন গৃহীত্বা নমো ঽমুক গোত্রে নান্দীমুখি মাতরমুকী দাসি এতত্তে পিণ্ডং নম ইতি বামহস্তান্বারব্ধ দক্ষিণ পাণিনাবনেজন স্থানে দদ্যাৎ। ততঃ প্রত্যেকং জলস্পর্শ পূর্ব্বকং পিতামহ্যাদ্যষ্টভ্যো মধ্যাগ্রক্রমেণ স্বস্বাবনেজন স্থানে দদ্যাৎ। পিত্রাদি পক্ষে লিঙ্গোহঃ। ততঃ আস্তীর্ণ কুশমূলেষু ওঁ লেপভুজো নান্দীমুখাঃ পিতরঃ প্রীয়ন্তামিতি ব্রাহ্মণেন পঠিতে নমো নম ইত্যুচ্চার্য্য হস্তলেপং নিধৃ-ষ্যাচম্য হরিং স্মৃত্বা ওঁ অত্র নান্দীমুখাঃ পিতরো মাদয়ধ্বং যথাভাগমাবৃষায়ধ্বমিতি ব্রাহ্মণেন পঠিতে নমো নম ইতি জপন্ বামাবর্ত্তেনোদঙ্মুখো ভূত্বা গ্লানি পর্য্যন্তং শ্বাসং ধৃত্বা তেনৈব পথা পরাবর্ত্তমানঃ সর্ব্বান্ পিতৄন্ ভাস্বর মূর্ত্তিকান্ ধ্যায়ন্ ওঁ অমীমদন্ত নান্দীমুখাঃ পিতরো যথা ভাগমাবৃষায়িষত ইতি ব্রাহ্মণেন পঠিতে নমো নম ইতি জপন্ শ্বাসং ত্যজেৎ। ততঃ পূর্ব্বাবনেজন বিশিষ্ট জলেন নমো ঽমুক গোত্রে নান্দীমুখি মাতরমুকী দাসি প্রত্যবনেনিক্ষ্ব নম ইত্যনেন প্রত্যবনেজনজলং পিণ্ডোপরি দদ্যাৎ। এবং পিতামহ্যাদ্যষ্টভ্যো যথাযথং দদ্যাৎ। ততো নীবীং বিস্রংস্যাচম্য ওঁ বসন্তা-য়েত্যাদি ঋতুনমস্কাররূপে ব্রাহ্মণেন পঠিতে নমো নম ইতি জপেৎ। যথা ওঁ নমো বো নান্দীমুখাঃ পিতরঃ শুষ্মায় ওঁ নমো বো নান্দীমুখাঃ পিতরস্তপসে ওঁ নমো বো নান্দীমুখাঃ পিতরো যজ্জীবস্তস্মৈ ওঁ নমো বো নান্দীমুখাঃ পিতরো রসায় ওঁ নমো বো নান্দীমুখাঃ পিতরো ঘোরায় মন্যবে ওঁ পুষ্টৈ বো নান্দীমুখাঃ পিতরো নম ইতি কাণ্বশাখিনাং গৌড়ীয়ানাং মতং। ততো নবমনবম্বা শুক্লবস্ত্র দশাভবং সূত্রং গৃহীত্বা ওঁ এতদ্বো নান্দীমুখাঃ পিতরো বাস ইতি ব্রাহ্মণেন পঠিতে নমো

নম ইতি জপ্ত্বা নমোঽমুক গোত্রে নান্দীমুখি মাতরমুকী দাসি এতত্তে বাসো নমঃ। এবং পিতামহ্যাদ্যন্ত পিণ্ডেষু দদ্যাৎ। ততস্তস্থান্ পিতৃনুদ্দিশ্য পিণ্ডান্ গন্ধাদিনা পূজয়েৎ। তত ওঁ সুসুপ্রোক্ষিতমস্তিতি ব্রাহ্মণেন পঠিতে নমো নম ইত্যনেন ব্রাহ্মণাগ্র-ভূমিমাসিঞ্চেৎ। ততো দৈবপূর্ব্বং ওঁ শিবা আপঃ সন্তিৃতি ব্রাহ্মণেন পঠিতে নমো নম ইত্যনেন জলং দদ্যাৎ ওঁ সন্তিৃতি প্রতিবচনং। ওঁ সৌমনস্যমস্তিৃতি ব্রাহ্মণেন পঠিতে নমো নম ইত্যনেন কৃতাঞ্জলিঃ পুষ্পানি দদ্যাৎ ওঁ অস্তিৃতি প্রতিবচনং। ওঁ অক্ষতঞ্চারিষ্টঞ্চাস্তিৃতি ব্রাহ্মণেন পঠিতে নমো নম ইতি জপন্ যবান দদ্যাৎ। ওঁ অস্তিৃতি প্রতিবচনং। ততো যবাজ্য-মধুসংযুক্তং জলং গৃহীত্বা নমোঽমুক গোত্রায়া নান্দীমুখ্যা মাতরমুকী দাস্যা নান্দীমুখশ্রাদ্ধে ঽস্মিন্ দত্তমিদমন্নপানাদিক মক্ষয্য মস্তিৃতি ব্রাহ্মণে দদ্যাৎ ওঁ অস্তিৃতি প্রতিবচনং। এবং পিতামহ্যাদ্যষ্টভ্যো দদ্যাৎ। ওঁ অঘোরা নান্দীমুখাঃ পিতরঃ সন্তিৃতি ব্রাহ্মণেন পঠিতে নমো নম ইতি জপেৎ। ওঁ সন্তিৃতি প্রতিবচনং। ওঁ গোত্রং নো বর্দ্ধতামিতি ব্রাহ্মণেন পঠিতে নমো নম ইতি জপেৎ। ওঁ বর্দ্ধতামিতি প্রতিবচনং। ততঃ প্রাঞ্জলিঃ সুমনাস্তন্মনা ভূত্বা পিতৃন্ বরং যাচেত। ওঁ দাতারো নোভিবর্দ্ধন্তামিত্যাদৌ ব্রাহ্মণেন পঠিতে নমো নম ইতি জপেৎ। ওঁ সন্তিৃতি প্রতিবচনং। ততঃ সপবিত্র কুশান্ পিণ্ডো-পরি দদ্যাৎ। ওঁ নান্দীমুখান্ পিতৃন্ বাচয়িষ্যে ইতি ব্রাহ্মণেন পঠিতে নমো নম ইতি জপেৎ। ওঁ বাচ্যতামিত্যনুজ্ঞাতঃ ওঁ নান্দীমুখ্যো মাতরঃ প্রীয়ন্তাং এবং পিতামহ্যাদ্যষ্টসু কৃত্বা ওঁ প্রীয়ন্তামিতি ব্রাহ্মণেন প্রত্যুক্তে নমো নম ইতি জপেৎ। তত ওঁ উর্জ্জং বহন্তীরিত্যাদি নান্দীমুখান্ পিতৃনিত্যন্তং ব্রাহ্মণেন পঠিতে নমো নম ইতি জপন্ সিঞ্চেৎ। ততঃ স্বস্থান

স্থিতান্ পিণ্ডান্নত্রীভুয়াস্রায় উত্থাপয়েৎ। ততো ন্যুব্জপাত্রমুত্তানীকৃত্য নমোঽদ্যেত্যাদি অমুক গোত্রায়া নান্দীমুখ্যা মাতরমুকী দাস্যা অমুক গোত্রায়া নান্দীমুখ্যাঃ পিতামহ্যা অমুকী দাস্যা অমুক গোত্রায়া নান্দীমুখ্যাঃ প্রপিতামহ্যা অমুকী দাস্যাঃ কৃতৈতদাভ্যুদয়িক শ্রাদ্ধপ্রতিষ্ঠার্থং দক্ষিণামিদং দ্রাক্ষামলকমূলং যথালাভং তন্মূল্যং বা বিষ্ণুদৈবতং যথানাম গোত্রায় ব্রাহ্মণায়াহং দদানীতি দক্ষিণাং দদ্যাৎ। এবং লিঙ্গোহেন পিতৃপক্ষমাতামহপক্ষয়োরপি। ততো দৈবে নমোঽদ্যেত্যাদি বসুসত্যয়োর্ব্বিশ্বেষাং দেবানাং কৃতৈতদাভ্যুদয়িক শ্রাদ্ধপ্রতিষ্ঠার্থং দক্ষিণামিদং কাঞ্চনং তন্মূল্যং ফলং বা বিষ্ণুদৈবতং যথানাম গোত্রায় ব্রাহ্মণায়াহং দদানীতি দদ্যাৎ। তত ওঁ বিশ্বে দেবাঃ প্রীয়ন্তামিতি ব্রাহ্মণেন পঠিতে নমো নম ইতি জপেৎ। ওঁ প্রীয়ন্তামিতি প্রতিবচনং। তত ওঁ দেবতাভ্য ইত্যাদি ব্রাহ্মণেন ত্রিঃ পঠিতে নমো নম ইতি জপেৎ। ওঁ বাজে ২বাজে ইত্যাদি ব্রাহ্মণেন পঠিতে নমো নম ইতি জপন্ কুশাগ্রেণ ব্রাহ্মণস্থান্ পিতৃন্ বিসৃজ্য পশ্চাদ্ব্রাহ্মণস্থান্ দেবান্ বিসর্জ্জয়েৎ। ওঁ আ মা বাজস্যেত্যাদি ব্রাহ্মণেন পঠিতে নমো নম ইতি জপন্ প্রদক্ষিণ বারিধারয়া ব্রাহ্মণান্ বেষ্টয়ন্ প্রণমেৎ। ততঃ পিণ্ডান্ গো ২জ বিপ্রেভ্যো দদ্যাৎ জলে বা ক্ষিপেৎ। শ্রাদ্ধীয় দ্রব্যং ব্রাহ্মণায় দদ্যাৎ জলে বা ক্ষিপেৎ। ততো দক্ষিণ পাণিনা দীপং প্রচ্ছাদ্য হস্তৌ প্রক্ষাল্যাচম্য এতৎ শ্রাদ্ধকর্ম্মাছিদ্রমস্ত্বিত্যছিদ্রমবধারয়েৎ। ততো নমোঽদ্যেত্যাদি এতৎ শ্রাদ্ধবৈগুণ্য সমাধানার্থং বিষ্ণোঃ স্মরণমহং করিষ্যে ইতি সংকল্প্য ওঁ তদ্বিষ্ণোরিত্যাদি ব্রাহ্মণেন পঠিতে নমো নম ইতি বিষ্ণুং স্মরেৎ। ততো বৈশ্যদেব বলি কর্ম্মণী কুর্য্যাৎ। অন্যৎ সামগশ্রাদ্ধ তত্ত্বেঽনুসন্ধেয়ং॥ * ॥

অথ ঋগ্বেদিনাং বৃষোৎসর্গপদ্ধতিঃ। কার্ত্তিক্যাং পৌর্ণমাস্যাং বৈশাখ্যাং বা একাদশাহে ত্রৈপক্ষে ষন্মাসে সংবৎসরে বা গোষ্ঠে গোশালায়াং বা পুণ্যেঽহ্নি বা সুপ্রক্ষালিত পাণিপাদঃ পুণ্যাহাদিকং বাচয়িত্বা স্বস্তিবাচনং কৃত্বা সঙ্কল্পং কুর্য্যাৎ। ওঁ অদ্যেত্যাদি অমুক গোত্রস্য প্রেতস্যামুক দেবশর্ম্মণো ঽশৌচান্তাদ্দ্বিতীয়েঽহ্নি অমুক গোত্রস্যামুক দেবশর্ম্মণঃ প্রেতলোক পরিত্যাগপূর্ব্বক স্বর্গলোক গমনকামঃ সালঙ্কৃতবৎসতরীচতুষ্টয় সহিত বৃষোৎসর্গমহঙ্করিষ্যামীতি সংকল্প্য স্বশাখোক্তং সঙ্কল্পসূক্তং পঠেৎ। নীলবৃষে তু নীলপদ প্রক্ষেপঃ। ততো ঽর্হণা বিধিক্রমেণার্চ্চয়িত্বা যথাক্রমেণাচার্য্যাদীন্ বরয়েৎ। ততো ব্রহ্মাণং তন্ত্রধারং সদস্যং যথাবিধি বরয়েৎ। তত আচার্য্যঃ কৃত সকলীকরণার্ঘ্যপাত্রং কৃত্বা শ্বেতসর্ষপেণ। ওঁ রক্ষোহনো বল্‌গহনঃ প্রোক্ষয়ামি বৈষ্ণবান্ রক্ষোহনো বল্‌গহনো বলয়ামি বৈষ্ণবান্ রক্ষোহনো বল্‌গহন উপস্তৃণামি বৈষ্ণবান্ রক্ষোহনৌ বলগহনাবুপদধামি বৈষ্ণবীং রক্ষোহনৌ বলগহনৌ পর্য্যূহামি বৈষ্ণবীং বৈষ্ণবমসি বৈষ্ণবাস্থঃ। ইতি রক্ষাসূক্তেন রক্ষাং বিধায়ঃ ভূতক্রূরান্নিঃসার্য্য পাবমানীসূক্তং পুরুষসূক্তঞ্চ পঠেৎ। তদ্যথা ওঁ পাবমানী স্বস্ত্যয়নী সুদুঘাহি ঘৃতচ্যুতঃ ঋষিভিঃ সংভৃতো রসো ব্রাহ্মণেষমৃতং হিতম্॥ ১ ॥ ওঁ পাবমানীর্দ্দিশন্তু ন ইমং লোকমথোঽমুং কামান্ সংবর্দ্ধয়ন্তু নো দেবৈর্দ্দেবৈঃ সমাহিতাঃ॥ ২ ॥ ওঁ যেন দেবাঃ পবিত্রেণাত্মানং পুনতে সদা। তেন সহস্র ধারেণ পাবমান্যঃ পুনন্তু মাং॥ ৩ ॥ ওঁ প্রজাপত্যং পবিত্রং সতোদ্যামং হিরণ্ময়ং। তেন ব্রহ্মবিদো বয়ং পূতং ব্রহ্মপুনীমহে॥ ৪ ॥ ওঁ ইন্দ্রঃ সুনীতিঃ সহ মা পুনাতু সোমঃ স্বস্ত্যা বরুণঃ সমীচ্যা। যমো রাজা প্রমৃণাভিঃ পুনাতু মাং জাতবেদা মূর্জ্জয়ন্ত্যা পুনাতু॥ ৫ ॥ ওঁ ঋষয়স্ত তপস্তেপে সর্ব্বে সর্ব্ব জিগীষবঃ। তপস

স্তাপসোগ্রস্তু পাবমানী ঋচোঽব্রবীৎ ॥ ৬ ॥ ওঁ জন্মে গর্ভে বসতঃ পাপমুগ্রং যজ্জায়মানস্য চ কিঞ্চিদন্যৎ জাতস্য যচ্চাপিচ বর্দ্ধতো মে তৎপাবমানীভি রহং পুনামি ॥ ৭ ॥ ওঁ ক্রয় বিক্রয়াদ্যোনিদোষাদ্ভক্ষাদ্ভোজ্যাৎ প্রতিগ্রহাৎ। অসদ্ভোজনাচ্চাপি নৃশং তৎপাবমানীভি রহং পুনামি ॥ ৮ ॥ ওঁ বালঘ্নান্মাতৃপিতৃবধাদ্ভূমিতস্করাৎ সর্ব্ববর্ণগমনমৈথুনসঙ্গমাৎ। পাপেভ্যশ্চ প্রতিগ্রহং সদ্যঃ প্রহরন্তি সর্ব্বদুষ্কৃতং তৎপাবমানীভি রহং পুনামি ॥ ৯ ॥ ওঁ ব্রহ্মবধাৎ সুরাপানাৎ সুবর্ণস্তেয়াদ্বৃষলীগমনমৈথুনসঙ্গমাৎ। গুরোর্দ্দারাভি গমনাচ্চ তৎপাবমানীভি রহং পুনামি ॥ ১০ ॥ ওঁ গোঘ্নাত্তস্করত্বাৎ স্ত্রীবধাদ্যচ্চ কিল্বিষং। পাপকঞ্চরণেভ্যস্তৎপাবমানীভি রহং পুনামি ॥ ১১ ॥ ওঁ দুর্যষ্টং দুরধীতং পাপং যচ্চাজ্ঞানতঃ কৃতং। অযাচিতাচ্চাসংযষ্যাচ্চসংযষ্যাচ্চ তৎপাবমানীভি রহং পুনামি ॥ ১২ ॥ ওঁ অমন্ত্র মন্নং যৎকিঞ্চিদ্দূয়তে চ হুতাশনে। সম্বৎসরকৃতং পাপং তৎপাবমানীভি রহং পুনামি ॥ ১৩ ॥ ওঁ ঋতস্য যোনয়ো ঽমৃতস্য ধাম বিশ্বাদেবেভ্যঃ পুণ্যগন্ধাঃ। তানাপঃ প্রহরন্তি পাপং শুদ্ধা গচ্ছামি সুকৃতাত্মলোকং তৎপাবমানীভি রহং পুনামি ॥ ১৪ ॥ ওঁ পাবমানীঃ স্বস্ত্যয়নীর্যাভি র্গচ্ছতি নন্দনং। পুণ্যাংশ্চ ভক্ষান্ ভক্ষয়ত্যমৃতত্বঞ্চ গচ্ছতি ॥ ১৫ ॥ ওঁ পাবমানং পরং ব্রহ্ম সত্যং জ্যোতিঃ সনাতনং। ঋষিং তস্যোপতিষ্ঠেৎ ক্ষীরং সর্পির্ম্মধূদকং ॥ ১৬ ॥ ওঁ পাবমানীং পিতৄন্দেবান্ ধ্যায়েদযচ্চ সরস্বতীং। পিতৄংস্তস্যোপতিষ্ঠেৎ ক্ষীরং সর্পির্ম্মধূদকং ॥ ১৭ ॥ * ॥ * ॥ ইতি পাবমানীসূক্তং ॥ * ॥ * ॥

অথ পুরুষসূক্ত মন্ত্রাঃ। সহস্রশীর্ষাপুরুষঃ সহস্রাক্ষঃ সহস্রপাৎ। স ভূমিং সর্ব্বতঃ স্পৃষ্ট্বা অত্যতিষ্ঠদ্দশাঙ্গুলং॥ ১ ॥ ওঁ পুরুষ এবেদং সর্ব্বং যদ্ভূতং যচ্চ ভাব্যং উতামৃতত্বস্যেশানো যদন্যেনাতিরোহতি ॥ ২ ॥ ওঁ এতাবানস্য মহিমাতো জ্যায়াংশ্চ পুরুষঃ। পাদোঽস্য বিশ্বাভূতানি ত্রিপাদস্যামৃতং দিবি ॥ ৩ ॥ ত্রিপাদূর্দ্ধমুদৈতি পুরুষঃ পাদোঽস্যেহাভবৎ পুনঃ। ততো বিশ্বং ব্যক্রামৎ শাসনানশনেঽভি ॥ ৪ ॥ ওঁ ততো বিরাড় জায়ত বিরাজোঽধি পুরুষঃ সজাতো অত্যরিচ্যত পশ্চাদ্ভূমি মথো পুরঃ ॥ ৫ ॥ ওঁ যৎপুরুষেণ হবিষা দেবা যজ্ঞমতন্বতঃ বসন্তোঽস্যাসীদাজ্যং গ্রীষ্ম ইধ্মঃ শরদ্ধবিঃ ॥ ৬ ॥ ওঁ তং যজ্ঞং বর্হিষি প্রোক্ষন্ পুরুষং জাতমগ্রতঃ। তেন দেবা অজয়ন্তঃ সাধ্যাশ্চ ঋষয়শ্চ যে ॥ ৭ ॥ ওঁ তস্মাদযজ্ঞাৎ সর্ব্বহুতঃ সংভৃতঃ পৃষদাজ্যং পশূংস্তাংশ্চক্রে বায়ব্যা নারায়ণ্যা গ্রাম্যাশ্চ যে ॥ ৮ ॥ ওঁ তস্মাদযজ্ঞাৎ সর্ব্বহুত ঋচঃ সামানি যজ্ঞিরে ছন্দাংসি যজ্ঞিরে তস্মাদ্যজু তস্মাদজায়ত ॥ ৯ ॥ ওঁ তস্মাদশ্বা অজায়ন্ত যে কে চোভয়াদতঃ। গাবহ যজ্ঞিরে তস্মাত্তস্মাজ্জাতা অজাবয়ঃ ॥ ১০ ॥ ওঁ যৎ পুরুষং ব্যদধুঃ কতিধা ব্যকল্পয়ন্ মুখং কিমস্যাসীৎ কিং বাহূ কিমূরু পাদাবুচ্যেতে ॥ ১১ ॥ ওঁ ব্রাহ্মণোঽস্য মুখমাসীদ্বাহূ রাজন্যঃ কৃতঃ॥ ঊরূ তদস্য যদ্বৈশ্যঃ পদ্ভ্যাং শূদ্রো অজায়ত ॥ ১২ ॥ ওঁ চন্দ্রমা মনসোজাত শ্চক্ষোঃ সূর্য্যো অজায়ত। শ্রোত্রাদ্বায়ুশ্চ প্রাণাশ্চ মুখাদগ্নিরজায়ত ॥ ১৩ ॥ ওঁ নাভ্যা আসীদন্তরীক্ষং শীর্ষ্ণো দ্যৌঃ সমবর্ত্তত। পদ্ভ্যাং ভূমির্দ্দিশঃ শ্রোত্রাত্তথা লোকানকল্পয়ন্ ॥ ১৫ ॥ ওঁ সপ্তস্যাশন্ পরিধয় স্ত্রিঃ সপ্ত সমিধঃ কৃতাঃ। বেদা যদ্যজ্ঞং তন্বানা অবুধন্ পুরুষং পশুং॥ ১৫ ॥ ওঁ যজ্ঞেন যজ্ঞ মযজন্ত দেবা স্তানি ধর্ম্মাণি প্রথমান্যাসন্। তেঽনাকং মহিমানঃ সচয়ন্ত যত্র

পূর্ব্বে সাধ্যাঃ সন্তি দেবাঃ॥ ১৬॥ ওঁ অদ্ভ্যঃ সংভৃতঃ পৃথিব্যৈরসাচ্চ বিশ্বকর্ম্মণঃ সমবর্ত্ততাগ্রে। তস্য ত্বষ্টা বিদধদ্রূপমেতি তন্মর্ত্ত্যস্য দেবত্বমাদানমগ্রে॥ ১৭ ॥ ওঁ দেবাহমেতং পুরুষং মহান্তমাদিত্যমন্তং তমসস্তু পারে। তমেব বিদিত্বাতি মৃত্যু-মেতি নান্যঃ পন্থা বিদ্যতে অনায়॥ ১৮ ॥ ততো হোতা পঞ্চগব্যং শোধয়েৎ। তদ্যথা গায়ত্র্যা গোমূত্রং॥ ১ ॥ ওঁ গাব-শ্চিদঘাসমন্যবঃ সজাত্যেন মরুতঃ সবান্ধবঃ॥ ককুভোরিহতে মিথঃ। ইতি গোময়ং॥ ১ ॥ ওঁ আপোঽদ্যানুচার্য্যং রসেন সমগন্মহি। পয়স্মানগ্ন আগহি তন্মাসংসৃজ বর্চ্চসা। দুগ্ধস্য॥ ৩ ॥ উদ্বুধ্যধ্বংসমনসঃ সখায় নগ্নিমিদ্ধং বহবঃ সনীলাঃ। দধিক্রামগ্নিমুষঞ্চ দেবীমিন্দ্রাবতো স্বস্তিতে পারমসীর॥ দধ্নঃ ॥ অগ্নিরশ্মিন্ জন্মনা জাতবেতা ঘৃতন্মেচক্ষুরমৃতস্ম আসন্। অর্কস্ত্রিধাতুরজসো বিমানো জস্রোঘর্ম্মোহবিরস্মনাং॥ ঘৃতস্য॥ ৫ ॥ ওঁ যোগে যোগে তরস্তরং বাজে বাজে হবামহে। সখায় ইন্দ্রমূতয়ে আয়ুয়ে প্রজায়ৈ কুশোদকস্য॥ ৬ ॥ ওঁ গায়ত্রেণ ত্বা চ্ছন্দসা মন্থামি ত্রৈষ্টুভেনত্বা ছন্দসা মন্থামি জাগতেন ত্বা চ্ছন্দসা মন্থামি ভূর্ভুবঃ স্বস্ত্বেষ তে। একত্রীকরণস্য॥ ৭ ॥ ইতি পঞ্চগব্যং সংশোধ্য তেন যাগভূমিং সংপ্রোক্ষ্য। ওঁ বেদ্যা বেদীঃ সমাপ্যতে বর্হিষা বর্হিরিন্দ্রয়ং যূপেন যূপ আপ্যায়তে প্রণীতোঽগ্নিরগ্নিনা। ইতি বেদীং সংপ্রোক্ষ্য ওঁ বিমান এষ দীবোমধ্যাস্ত আপ্রিয়ান্রোদসী অন্তরীক্ষং সবিশ্বাচীরভিচষ্টে ঘৃতাচীরন্তরা পূর্ব্বমপরঞ্চ কেতুং। ইতি বিতানং বদ্ধা বেদ্যাঃ পূর্ব্বস্যাং পঞ্চঘটান্ স্থাপয়েৎ॥ মন্ত্রো যথা॥ উর্ব্বী সদ্মনী বহুশ্বতে সুহবে দেবানাম সাজনিত্রী। দধাতে সুভগেযু প্রতীকে দ্যাবা রক্ষিতং পৃথিবী নো অহ্বা॥ ভূমেঃ। ওঁ ধানাবন্তং করম্বিনমপূপবন্তমুক্থিনং। ইন্দ্রাত্বাদাভূমিত্যসঃ॥ ৪৮৬

ধান্যস্য। ওঁ এতানি ভদ্রা কলসক্রিয়া মা কুরু শ্রবন্দদতো মঘানি। দান ইন্দ্রো মঘবান সোমস্তুঞ্চসোমো হৃদয়ং বিঘর্দ্ধি। ঘটস্য
ওঁ বরুণস্যো ত্তম্ভনমসি বরুণস্য স্কম্ভ সর্জ্জনীস্থো বরুণস্য ঋতসদন্যসি বরুণস্য ঋতসদনী মাসীদ ॥ যমস্য। ওঁ স্থিরো ভব-
বিড্বঙ্গ আশুর্ভব বাহ্যর্ব্বন পৃথুর্ভব সুসদস্তমগ্নে পুরীষবাহন। স্থিরীকরণস্য ইতি ঘটান্ সংস্থাপ্য যজমানাভিষেকার্থং
ওঁ সর্ব্বে সমুদ্রাঃ সরিতঃ সরাংসি চ নদাহ্রদাঃ। আয়ান্তু যজমানস্য দুরিতক্ষয় কারকাঃ। ইত্যনেন চ শান্তিকলসং স্থাপয়েৎ।
ততস্তেষু ঘটেষু গণেশাদীন্ স্ব স্ব মন্ত্রৈরাবাহ্য পূজয়েৎ। মন্ত্রশ্চ তেনৈব ক্রমেণ। ওঁ গণানান্ত্বাগণপতিং হবামহে কবিং
কবীনামুপশ্রবস্তমং। জ্যেষ্ঠরাজং ব্রাহ্মণান্ ব্রহ্মণস্পতয়ান্ শৃন্বন্নূতিভিঃ সীদসাদনং ॥ গণেশস্য ॥ ওঁ ত্র্যম্বকং যজামহে সুগন্ধিং
পুষ্টিবর্দ্ধনং। উর্ব্বারুকমিববন্ধনাৎ মৃত্যোর্মুক্ষীয় মামৃতাৎ ॥ শিবস্য। ওঁ আকৃষ্ণেন রজসা বর্ত্তমানো নিবেশয়ন্নমৃতং মর্ত্যঞ্চ।
হিরণ্ময়েন সবিতা রথেনাদেবো যাতি ভুবনানি পশ্যন্ ॥ সূর্য্যস্য। ওঁ অগ্নিম্দূতং পুরোদধে বৃণীমহে হোতারং বিশ্ববেদসং।
অস্য যজ্ঞস্য সুক্রতুং। ওঁ বিষ্ণোর্নুকং বীর্য্যানি প্রবোচং যৎপার্থিবানি বিমমে রজাংসি। জ্যোকচভা যদুত্তরং সমস্তং বিচ-
ক্রমাণস্ত্রেধোরুগায়ো বিষ্ণবে ত্বা ॥ বিষ্ণোঃ। ওঁ দেবীং বাচমজয়ন্ত দেবাস্তাং বিশ্বরূপাঃ পশবো বদন্তি। মানো মন্ত্রেষু মূর্জ্জং
দুহানাধেনুর্ব্বাগস্মানুপসৃষ্টতে তু নঃ ॥ দুর্গায়াঃ। ওঁ শ্রিয়ে জাত শ্রিয়য়া নির্যজেয়ং শ্রিয়ং বয়ো জরিতৃভ্যো দদাতি। শ্রিয়ং
বসানামমৃতত্ত্বমায়ং ভবন্তি সত্যাসমিথ্যামিতদ্রৌ ॥ লক্ষ্ম্যাঃ। ওঁ সরস্বত্যভিনো নেমিবস্যোমাপস্ফুরী। মান আদক জুষস্বনঃ সখ্যা-
সরস্যা চ মা ত্ব ক্ষেত্রান্যবনানি জন্ম। সরস্বত্যাঃ। ওঁ বাস্তোষ্পতে প্রতরণো নয়েধি গয়স্কামো গোভিরশ্বেভিরিন্দ্রোঃ। অজবাসস্তে

সখ্যে স্যামপিতেব পুত্রান্ প্রভিতন্নোজুষস্ব ॥ বাস্তোঃ ॥ ততো নবগ্রহান্ পূজয়েৎ ॥ ওঁ আকৃষ্ণেনেতি সূর্য্যং ॥ ওঁ আপ্যায়
স্বসমেতুতে বিশ্বতঃ সোমবৃষ্ণ্যং। ভবাবা যস্য সংগথে। সোমস্য। ওঁ অগ্নির্মূর্দ্ধা দিবঃ ককুৎপতিঃ পৃথিব্যা অয়মপাং।
রেতাংসি জিন্বতি। মঙ্গলস্য। উদ্বুধ্যধ্বংসমনসঃ সখায় সমগ্নিমিন্ধং বহবঃ সনীলাঃ। দধিক্রামগ্নিমুষসঞ্চদেবীমিন্দ্রাবতো
স্বস্তিতে পারয়সীয় ॥ বুধস্য। ওঁ বৃহস্পতেঽতি অদর্য্যোঽর্হাদ্ভামদ্বিভাতি ক্রতুমর্জ্জনেষু। যদ্দীদয়ৎ সরস ঋতপ্রজাতদস্মাসু-
দ্রবিণং ধেহি চিত্রং। বৃহস্পতেঃ ॥ ওঁ শুক্রঃ সুশুক্রং উসো ন জাবঃ পপ্রাসমীচী দিবো ন জ্যোতিঃ। কৃত্বা বভূথ ভুবে দেবানাং পিতা
পুত্রঃ সন্ ॥ শুক্রস্য ॥ ওঁ সমগ্নিরগ্নিভিঃ করচ্ছন্নস্তপতু সূর্য্যঃ। সংবাতো বাত্বরপামুপস্ত্রধঃ ॥ শনৈশ্চরস্য। ওঁ কয়া ন শ্চিত্র
আভুবদূতী সদাবৃধঃ সখা কয়া শচীষ্ঠয়া সংবৃতা ॥ রাহোঃ ॥ ওঁ কেতুং কৃণ্বন্নকেতবে পেশোমর্য্যাঽপেশসে সমুসদ্ভি রজায়থা ॥ কেতুনাং
ততো দিক্পালান্ পূজয়েৎ ॥ ওঁ যত ইন্দ্রস্বয়ামহে ততো নোঽভয়ং কৃধি। মঘবন সন্ধিরতন্নত উতিভির্ব্বিদ্বিষো বিমৃধে
জহি ॥ ইন্দ্রস্য ॥ অগ্নিন্দুতমিত্যগ্নেঃ ॥ যমায় সোমং সুরতনয়া সুহুতা হবিঃ। যমোহয়জ্ঞো গচ্ছত্বমগ্নিন্দুতোঽবদ্ধৃতঃ ॥ যমস্য
ওঁ মোষুনঃ পরাবরা নির্ঋতির্দ্দুরুহনাবধীত পদীষ্ট কৃষ্ণয়া সহ ॥ নির্ঋতেঃ ॥ ওঁ ত্বন্নোঽগ্নেবরুণস্যবিদ্বান্ দেবস্য হেলোঽবয়াসি-
সীষ্টাঃ। যজিষ্ঠোবহ্নিতমঃ শোশুচানো বিশ্বান্দ্বেষাংসি প্রমুমুগ্ধ্যস্মৎ ॥ বরুণস্য ॥ ওঁ তব বাযো ব্রতপতেঃ সুকুর্যমো তব ভুতং।
আবাসগাবৃণীমহে ॥ বায়োঃ ॥ ওঁ সোমোধেনু সোমোঽর্ব্বন্তমাপশুং সোমো বীরং কর্ম্মণ্যং। দদাতি সাদন্যং সীমতথ্যং সভেয়ং।
পীহশ্রবন্তো যো দদাহ স তস্মৈ ॥ কুবেরস্য ॥ ওঁ তমীশানাং জগতস্তস্থ বস্পতিং ধিয়ঞ্জিন্নবমসেহুমহে বয়ং। পূষাণো যথা বেধসাম-

সদ্বধেরক্ষিতা পায়ুরধ্বঃ স্বস্তয়ে ॥ ঈশানস্য ॥ ওঁ ব্রহ্মযজ্ঞানাং প্রথমং পুরস্তাদ্বিসীমতঃ সুরুচোবেন আবঃ। সবধ্না উপমা অস্য বিষ্ঠাঃ সতশ্চ যোনিমসতশ্চবিবঃ ॥ ব্রহ্মণঃ ॥ ওঁ কালিকো নামসর্পো নবনাগ সহস্রশঃ। যমুনাহ্রদদেশো জাতো যো নারায়ণবাহনঃ ॥ যদি কালিকদূতস্য যদি বা কালিকাদ্ভয়ং। জন্মভূমিপরিক্রান্তো নির্ব্বিষো যাতি কালিকঃ ॥ অনন্তস্য ॥ ততঃ স্বর্ণ শলাকয়া সর্ব্বতো ভদ্রমণ্ডলং বিলিখ্য তত্র রুদ্রং পূজয়েৎ ॥ তদ্যথা মণ্ডলে রাজতীং প্রতিমাং ন্যস্ত ওঁ উর্ব্বী সদ্মলীত্যাদিনা তাং সম্পূজ্য তদুপরি স্বর্ণচক্রমারোপ্য পদ্মস্যাগ্নেয়াদি দিক্ষু ধর্ম্মাদীন্ পূর্ব্বাদি দিক্ষু অধর্ম্মাদীংশ্চ মধ্যে আধারশক্তয়ে ব্রহ্মণে অনন্তায় কল্পবৃক্ষায় ক্ষীরসমুদ্রায় সত্ত্বায় রজসে তমসে আত্মনে অন্তরাত্মনে জ্ঞানাত্মনে অর্কসোমবহ্নিমণ্ডলেভ্যঃ বামায়ৈ জ্যেষ্ঠায়ৈ রৌদ্রৈ কাল্যৈ বলবিকারিণ্যৈ বলপ্রমাথিন্যৈ সর্ব্বভূতদমন্যৈ এতান্ প্রণবাদি নমো হন্তেন পূজয়েৎ ॥ কোণেষু নিবৃত্তিং প্রতিষ্ঠাং বিদ্যাং শান্তিং কেশরেষু হ্রাং হৃদয়ায় নম ইতি ষড়ঙ্গং সংপূজ্য ভূতশুদ্ধি প্রণায়ামং কৃত্বা ঋষ্যাদিন্যাসং কুর্য্যাৎ। শিরসি বামদেবায় ঋষয়ে নমঃ মুখে পংক্তিচ্ছন্দসে নমঃ হৃদি রুদ্রদেবতায়ৈ নমঃ। ততো হ্রাং অঙ্গুষ্ঠাভ্যাং নমঃ ইত্যাদিনা করাঙ্গন্যাসৌ কৃত্বা ধ্যায়েৎ ॥ মুক্তাপীতপয়োদ মৌক্তিকজবাবর্ণৈর্ম্মুখৈঃ পঞ্চভিস্ত্র্যক্ষৈ রঞ্জিতমীশমিন্দুমুকুটং পূর্ণেন্দুকোটিপ্রভং। শূলং টঙ্ক কপালবজ্রদহনান্নাগেন্দ্র ঘণ্টাঙ্কুশান্ পাশং ভীতিহরং দধানমসিতাকল্পোজ্জ্বলাঙ্গং ভজে ॥ ইতি ধ্যাত্বা মানসোপচারৈঃ সংপূজ্যার্ঘ্যং সংস্থাপ্য পুনর্ধ্যাত্বাবাহ প্রাণপ্রতিষ্ঠাং কৃত্বা মূলমুচ্চার্য্য এতৎ পাদ্যং শ্রী রুদ্রায় নম ইতি যথাসম্ভবোপচারৈঃ পূজয়েৎ। ততো বৃষস্য দক্ষিণফলকে ওঁ মানস্তোকে তনয়ে মান আয়ৌ মানো গোষু মানো হশ্বেষুরীরিষঃ।

বীরাম্নানো রুদ্রভাষিনো বধির্হবিষ্মন্তঃ সদসি ত্বা হবামহে। ইত্যনেন ত্রিশূলং বামে চ ওঁ ঋবভং মাস মানানাং সপত্নানাং বিষাহিং। হন্তারং শত্রূণাং কৃধি বিরাজং গোপতি গবাং। ইত্যনেন চক্রং লিখেৎ। তত ওঁ আপ ইত্বা উভেষজীস্তাস্তে কৃন্নন্তু ভেষজীঃ। ওঁ আপোহিষ্ঠেতি ওঁ যোবঃ শিবেতি ওঁ তস্মা অরঙ্গেতি ওঁ যাসাং দেবা যা দিবি কৃন্নন্তি ভক্ষ্যং যা অন্তরীক্ষে বহুধা ভবন্তি। যা হগ্নিং গর্ভং দধিরে সুপর্ণাস্তা আপো দেবীরিহ মামবন্তু। ওঁ যাসাং রাজা বরুণো যাতি মধ্যে সত্যান্নতে হব-পশ্যঞ্জনানাং। যা হগ্নিং গর্ভং দধিরে সুপর্ণাস্তা আপো দেবীরিহমামবন্তু। এতৈর্ব্বৈদিক মন্ত্রৈর্য্যং স্নাপয়েৎ। ততো রুদ্রসূক্তং শ্রাবয়িত্বা বৃষং সন্নিহিতে স্থাপয়েৎ। রুদ্রসূক্তং যথা। ওঁ কদ্রুরুদ্রায় প্রচেতসে মিঢ়ুষ্টমায় তব্যসে। বোচেমসন্তমং হৃদে। যথা নো হদিতিঃ করৎপশ্বে নৃভ্যো নারীভ্যো গবে। যথা তোকায় রুদ্রিয়ং। যথা নো রুদ্রবরুণো যথা রুদ্রশ্চিকেততি। যথা বিশ্বে-যজোষসঃ। গাথপতিং মেধপতিং রুদ্রং জলাসভেষজং। তচ্ছয়োঃ সুম্নমামহে। যঃ শুক্র ইব সূর্য্যো হিরণ্যমিব রোচতে। শ্রেষ্ঠ-দেবানাং বসুঃ। সন্নঃ করত্যর্ব্বতে সুগমেষ্য সায়মস্মৈ। নৃভ্যো নারীভ্যো গবে। অস্মৈ সোমশ্রিয়মধিনিধেহি সতস্য নৃণাং। মহি-শ্রবস্তু বিনিম্নং। মানঃ সোমপরিবাধো মাবাতয়ো জুহুবন্তঃ। আন ইন্দ্রো বাজে ভজ। যাস্তে প্রজায়ৃতস্য পয়স্মিদ্ধামনৃতস্য মূর্দ্ধনা-ভাসো মবেন। অভুবন্তী সোম বেদ। সোমো রুদ্রা ধারয়েথামসূর্য্যাং পুরামিষ্ট যোমবশ্রবন্তু। দমেদমে সপ্তরত্না দধানাঃ শন্নোভূং দ্বিপদেশঞ্চতুষ্পদে। সোমো রুদ্রা বিরৃত্রং বিসূচীমভিবায়ানো গয়মাবিবেশ। আবেবাধেথাং নির্ঋতিং পরাচৈনস্মৈ ভদ্রাসৌশ্রব-মানিসন্তু। সোমো রুদ্রা যুবমেতান্যস্মৈ বিশাতনূষু ভেসজানি ধত্তং। অবশ্য তং মুঞ্চতং যন্নোহস্ত তনূষু ভদ্রং কৃতমেনোহস্মৎ। তীগ্মা-

যুধ্বৌ তীগ্মহেতী সুযেবৌ সোমা রুদ্রা বৃহৎ সুমৃলতনূঃ। প্রাণমুঞ্চতং বরুণস্যপাশাদ্গোপায় তনুঃ সুমনস্য মানাঃ। ইমা রুদ্রায়-
তপসে কপর্দ্দিনে ক্ষয়দ্বীরায় প্রবরামহেমতীঃ। যথা সমসদ্বিপদেশঞ্চতুষ্পদে। বিশ্বং পুষ্টং গ্রামেঽস্মিন্ননাতুরং। মৃড়ানো রুদ্রো তনো-
ময়স্কৃধি ক্ষয়দ্বীরায় ক্ষয়সা বিধেমতে। যচ্ছন্তুয়োশ্চ মনুব্যায়ো যে পিতা তদস্যাম তব রুদ্র প্রণীতিষু। অস্যামতে সুমতিন্দেবজেহাক্ষয়-
দ্বীরস্য ভব রুদ্রমিড়ঃ। সুস্নায়ং বিদ্বিষো অস্মাকমাচরিষ্ট বীরা জুহো হুবামতে হবিঃ। ত্বেষ র্যয়ং রুদ্রং মনস্য বিহ্বয়ামহে। আনেঽস্ম-
দ্দৈব্যং হেলোঽস্যত্বু সুমতিমিত্বয়মস্যাবৃণীমহে। দিবো বরাহমরুষং কপর্দ্দিনং ত্বেষং রূপং মনসা বিহ্বয়ামহে। আস্তে ভদ্রাদ্ভেষজা-
বার্জ্জ্যানি শর্ম্মবর্ম্মছর্দ্দিরস্মভ্যং যং সৎ। ইদং পিত্রে মরুতা মুচ্যতে বচঃ স্বাদীয়ো রুদ্রায় বর্দ্ধনং। রাস্বা চ নো হমৃত মর্ত্ত্যভোজমৃণে 
তোকায় তনয়ায় মৃড়। মানোমহান্তমুত মানোঽর্ভাকস্মান উক্ষন্তমুতমান উক্ষিতং। মানোবধি পিতরং মোত মাতরশ্মানঃ প্রিয়ংস্তন্নো-
রুদ্র রীরিষ। মানস্তোকে তনয়ে মান অয়ো মানো গোষু মানোঽশ্বেষুরীরিষঃ। বীরান্মানো রুদ্রভামিনো বধির্হবিষ্মন্তঃ সদসিত্বা হবা-
মহে। উপতেস্তোমমানঃ পশুপা ইবাকরং রাস্মাপিতর্ম্মরুতাং সুম্নমস্যা। ভদ্রাহি নঃ সুমতির্মৃলয়ত্তমথো বয়মবত্বে বৃণীমহে। আবোতে
গোঘ্নাৎ পুরুষঘ্নং ক্ষয়দ্বীরসুম্নমস্মে তে হস্তু। মৃলাচনোঽধি চ ব্রূহি দেবাত্বচনঃ শর্ম্মযছদ্বিবর্হা। আবোচামন সোঽস্যা অবস্যবঃ শৃণোতু
নোঽবং রুদ্রো মরুত্বান্। তন্নো মিত্রো বরুণো মামহন্তামদিতিঃ সিন্ধুঃ। পৃথিবী উত দ্যৌ। ইমা রুদ্রায় স্থিরধন্বনো গিরঃ ক্ষিপ্রে সবে-
দায় স্বধাম্নে আমন্বায় বেধসে তিগ্মায়ুধায় ভবতামশৃণোতু নঃ। সহি ক্ষয়েণ ক্ষম্যস্য জন্মনঃ সাম্রাজ্যেন দিবস্য চেততি। অবন্নবন্তী দুরু-
শচলা অমী বো রুদ্রায় সুনো ভব। যাতে দিদ্যুদবসৃষ্টা দিবস্পরিক্ষায়াচরতি পরিসা বৃণক্তু নঃ। সহস্রান্তুষপি বাতভেষজমানস্তোকেষু-

তনয়েষু রীরিষঃ। মানো বধীরুদ্রমাপরাদয়াতে ভূতমপ্রনীতৌ হিনি তস্য। আনো ভবয়ং বর্হিবি যূয়ং পতেশ্বস্তিভিঃ সদাতঃ॥ আতে
পিতর্ম্মরুতাং সুম্নমেবতুমামঃ সূর্য্যস্য সদৃশো যূয়োথা। অভিনো বীরোঽর্ব্বতি ক্ষমেত প্রজায়ৈ মরি রুদ্রঃ প্রজাভিঃ। ত্বাদত্বেভী রুদ্রঃ
সমন্তেভিঃ শতং হিমা অসীয়র্ভেষজেভিঃ। কম্মাদ্বিধোবিতরব্যং হোব্যং মীবাশ্চ তে যস্ত্বাং বিশুচীঃ॥ শ্রেষ্ঠো জাতস্য রুদ্রপ্রিয়া পিতর-
স্তমস্তপসাং বজ্রবাহোপর্ষিণঃ। পারমহংসঃ স্বস্তিবিশ্বাঽভীতিরপসো যূয়োধিঃ॥ মা ত্বা রুদ্রচুক্রুধা মনোমাভিমাবিস্তুতী ব্রষভমাস-
হুতীঃ। তন্নো বীরাং অর্পতদ্ভেষভেষজেভির্ভিষক্ত মন্তু্াভিবজা শৃণোমি॥ হবির্ম্মভির্হরতে যোহবির্ভিরবস্তোমেভী রুদ্রং দিশীয়া। ঋদূ-
দবঃ সুহবো মানোঽস্যৈ বভ্রুঃ সুশিপ্রোবীরধর্ম্মণায়ৈ॥ উন্মাবমন্দ ব্রষভোমরুত্বান্তক্ষীয়সা বয়সামাধমানাং। ঘ্নণীবৎসায়া মবপায়-
সীয়া বিরামেয়ং রুদ্রস্য সুপ্তং॥ ক্বাস্যতে রুদ্রমূলয়া ককুর্হস্তো যো হস্তি ভেষজে জলাসঃ। অপভর্ত্তারপসো দৈব্য স্যাভিন্নলাব্রষভচক্ষ
মীথা॥ প্রবভ্রুবে ব্রষভা অশ্বিতীচে মহোমহীসুষ্টুতি মীবয়ামি। নমস্যা কল্মলী কিলং নমোভির্গ্ণীমি ত্বেষং রুদ্রস্য নাম॥ স্থিরে-
ভিরঙ্গে পুরুরূ উপশ্রোবভ্রুঃ শুক্রেভিপিপিযে হিরণ্যৈ। ঈশানো দাস্য ভুবনস্য দূরে নবা য়ূযো সক্রুদ্রদেস্থূর্য্য। অর্হন্বিভর্ষি শায়কানি-
ধন্বার্হং নিস্কং যজতং। বিশ্বরূপং। অর্হনিবদস্তু্রসে বিশ্বমভ্রং নবায়োজীবয়োরুদ্রস্তদস্তি॥ স্তুহিশ্রুতং গর্ত্তসদং যুবানং ম্রগমভী-
মূপহর্ত্তু্মুগ্রং॥ মূলাজরিত্রে রুদ্রস্তবানোঽন্যস্তে হস্মিন্নিবপর্ণসেমাঃ॥ কুমারশ্চিৎ পিতরং বন্দমানং প্রতিমানা মরুদ্রোপয়ন্তং॥
দূরৈর্দাতারং স্তুপসি গৃণীষে স্তুতস্ত্বং ভেষজাবাস্যস্মে॥ যাবো ভেষজামরুতঃ প্রচীনিয়াশন্তমাব্রণোয়া ময়োভূঃ। যানি মনুরব্রণী-
ভাপি তা নস্তা সঞ্চয়াশ্চরুদ্রস্য রশ্মি॥ পরিণোহেতি রুদ্রস্য ব্রক্কাৎপরিদ্বেষস্য দুর্ম্মতির্ম্মহী গাৎ। অবস্থিরা মঘবদ্ভ্য স্তনুষমিদ্রস্তোকয়া

তনয়ায় মৃল ॥ এবাবভ্রো বৃষভ চিকিতান যথাদেবেন হৃণীষেণ হিংসি। হবনঃ শৃণোরুদ্রোঽবোধি ॥ বৃহদ্বদেমবিদর্থেষু বীরাঃ। ধারাবমারুতোধৃষ্কবোয়শঃ ॥ * ॥ * ॥ ইতি রুদ্রসূক্তং সমাপ্তং ॥ * ॥ * ॥

তত্তো হোতা বাহুমাত্রং স্থণ্ডিলং গোময়েনোপলিপ্য তন্মধ্যতঃ কুশমূলেনোদক প্রাগগ্রা বড়েখা উল্লিখেৎ। তত্র প্রথমা প্রাদেশমাত্রা তস্যা উপর্য্যন্তয়োর্দ্ধে প্রাগগ্রে তয়োর্মধ্যে তিস্রঃ প্রাগগ্রা উদকসংস্থা অসংশ্লিষ্টাশ্চাভ্যুক্ষ্য। বশিষ্ঠঋষি রনুষ্টুপচ্ছন্দো ঽগ্নির্দ্দেবতা সন্নিহিত স্থানেঽগ্নিস্থাপনে বিনিয়োগঃ। ওঁ অয়ন্তে যোনি ঋত্বিজো যতো জাতোঽরোচথা। তং জানন্নগ্ন আসীদাথানো বর্দ্ধয়া গিরঃ ॥ ইত্যনেন সন্নিহিত স্থানেঽগ্নিং স্থাপয়েৎ। বিশ্বামিত্রঋষির্গায়ত্রীচ্ছন্দো ঽগ্নির্দ্দেবতা পূর্ব্বার্দ্ধেন ক্রব্যাদাংশ ত্যাগে বিনিয়োগঃ। ওঁ ক্রব্যাদমগ্নিং প্রহিণোমি দূরং যমরাজ্যং গচ্ছতু রিপ্রবাহ। ইতি ক্রব্যাদাংশং ত্যক্ত্বা শঙ্খঋষির্গায়ত্রীচ্ছন্দো-ঽগ্নির্দ্দেবতা উত্তরার্দ্ধেনাগ্নিগ্রহণে বিনিয়োগঃ ॥ ওঁ ইহৈবায়মিতরো জাতবেদা দেবেভ্যো হব্যং বহতু প্রজানন্। ইতি গৃহীত্বা বিশ্বামিত্রঋষির্গায়ত্রীচ্ছন্দো ঽগ্নির্দ্দেবতা অগ্নিস্থাপনে বিনিয়োগঃ। ওঁ অগ্নে জুষস্ব নো হবিঃ পুরোডাসং জাতবেদঃ প্রাতঃ সাবে-ধিয়া বসোঃ। প্রজাপতির্ঋষি বৃহতীচ্ছন্দঃ প্রজাপতির্দ্দেবতা ঽগ্নিস্থাপনে বিনিয়োগঃ। ওঁ ভূর্ভুবঃ স্বরোম্ ইতি মন্ত্রদ্বয়েন তদ্রেখোপরি অগ্নিং স্থাপয়েৎ। ততঃ প্রচুরতর কাষ্ঠেনাগ্নিমুপরংহয়েৎ যেন কর্ম্মসমাপ্তিং যাবৎ স্থিরো ভবতি। ততো রমিতি বহ্নিবীজেন ভূতশুদ্ধি প্রাণায়ামার্ঘ্যস্থাপনানি কৃত্বা সকলং বিচিন্ত্য সিসৃক্ষয়া মৃতবৃষ্টিং বিভাব্য তস্মাদুদ্ভূতাদর্দ্ধেনান্নং তদন্নঞ্চ দ্বিধা কৃত্বা তন্মধ্যে বহ্নিরূপমাত্মানং বিচিন্ত্য ধ্যায়েৎ। গৃৎসমদঋষি রনুষ্টুপ্‌ছন্দো ঽগ্নির্দ্দেবতা ঽগ্নিধ্যানে বিনিয়োগঃ। ওঁ চত্বারি

শৃঙ্গাস্ত্রয়োঽস্য পাদা দ্বে শীর্ষে সপ্তহস্তাঃ সোঽস্য ত্রিধাবদ্ধো বৃষভো রোরবীতি মহোদেবোমর্ত্যাং আবিবেশ ইতি ধ্যাত্বাবাহয়েৎ।
বামদেব্যঋষিস্ত্রিষ্টুপছন্দো ঽগ্নির্দ্দেবতা ঽগ্ন্যাবাহনে বিনিয়োগঃ। ওঁ এহ্যগ্ন ইহ হোতা নিষীদাদব্ধঃ স্বপুর এতা ভবানঃ। অব-
ন্তুস্বা রোদসী বিশ্বাবিশ্বে যজামহে সৌমনসায় দেবান ইত্যাবাহ্য। ওঁ অগ্নে ত্বং সাহসনামাসীতি নাম কৃত্বা পূজাদিকং পৌরা-
ণিকং তন্ত্রসিদ্ধং বা কার্য্যং। ঋষয়োদ্বিপদা বিরাট্ছন্দো ঽগ্নির্দ্দেবতাগ্ন্যুপস্থাপনে বিনিয়োগঃ। ওঁ অগ্নে ত্বন্নোঽন্তম উত ত্রাতা-
শিবো ভবাবরুদ্ধৈ। বসুরগ্নির্বসুশ্রবা অছানক্ষিদ্যুমত্তমং রয়িন্দাঃ। সনোবোধিশ্রুধীর স্বরুসানোঽঘায়ত সমস্মাৎ। তন্ত্বাশো
শিষ্ঠদীদিবঃ সুম্নায় নূনমীমহে সখিভ্য ইত্যুত্থায় পুটাঞ্জলিরগ্নিমুপস্থাপয়েৎ। ততো দ্বে দ্বে সমিধে প্রাদেশমাত্রে ঘৃতাক্তে
প্রাগগ্রে তুষ্ণীমগ্নৌ ক্ষিপেৎ। যত্র তুষ্ণীং তত্র প্রজাপতিপদং চতুর্থ্যন্তং স্মরেৎ॥ ওঁ পূর্ণমসি পূর্ণং মে ভূয়াঃ সুপূর্ণমসি সুপূর্ণং ১২৪
মে ভূয়াঃ সর্ব্বমসি সর্ব্বং মে ভূয়া অক্ষতমসি মামক্ষষ্টাঽমুত্রামুষ্মিন্ লোকে॥ প্রাচ্যান্দিশি দেবা ঋত্বিজোমার্জ্জয়ন্তাং দক্ষিণ-
স্যান্দিশি মাসাঃ পিতরো মার্জ্জয়ন্তাং প্রতীচ্যান্দিশি গৃহাঃ পশবো মার্জ্জয়ন্তাং উদীচ্যান্দিশ্যোষধয়ো বনস্পতয়ো মার্জ্জয়ন্তাং ঊর্দ্ধায়া-
ন্দিশি যজ্ঞঃ সম্বৎসরঃ প্রজাপতির্ম্মার্জ্জয়তাং ইতি মন্ত্রেণ পরিসমূহনপর্য্যুক্ষণেচাদাবন্তে চ ভবত ইতি পরিশিষ্টসূত্রাৎ। ততো
ঽগ্নেঃ পূর্ব্বত আরভ্য দক্ষিণাদি ক্রমেণোত্তরং যাবৎ সোদকেন পাণিনা ত্রিঃ প্রোঞ্ছনং কার্য্যং ততঃ পুনরপি পূর্ব্বত আরভ্য
দক্ষিণাদিক্রমেণোত্তরং যাবদনেন মন্ত্রেণ ত্রিঃ পর্য্যুক্ষণং যথা হোমীয় দ্রব্যস্যাপি প্রোক্ষণং ভবতি। ততোঽগ্নেঃ পূর্ব্বত আরভ্য
দক্ষিণাদি ক্রমেণোত্তরং যাবত্রিভিরুদক প্রাগগ্রৈঃ কুশৈঃ পরিস্তরণং কার্য্যং॥ ওঁ এষো হ দেব প্রদিশোনু সর্ব্বাঃ পূর্ব্বোঽজাতঃ

ষড়গর্ব্ভেন্ত স এব জাতঃ স জনিষ্যমাণঃ প্রত্যঙ্জনাস্তিষ্ঠতি বিশ্বতো মুখঃ ॥ ইতি মন্ত্রেণ ॥ ততো অগ্নের্দ্দক্ষিণতঃ প্রাগগ্রাস্তীর্ণকুশেষু ব্রহ্মাসনমুপকল্প্য হোতা প্রজাপতির্ঋষির্গায়ত্রীচ্ছন্দঃ প্রজাপতির্দ্দেবতা তৃণনিরসনে বিনিয়োগঃ। ওঁ নিরস্তঃ পরাবসু ইত্যনেন ব্রহ্মাসনাৎ কুশপত্রমেকং বামহস্তানামিকাঙ্গুষ্ঠাভ্যাং গৃহীত্বা দক্ষিণস্যান্দিশি ক্ষিপেৎ। ততঃ প্রজাপতির্ঋষি স্তুষ্টুপচ্ছন্দো হগ্নি-র্দ্দেবতা ব্রহ্মোপবেশনে বিনিয়োগঃ। ওঁ ইদমহমর্ব্বাবসোঃ সদনে সীদ। ওঁ সীদামীতি পঠিত্বা উত্তরা মুখো ব্রহ্মা উপবিশেৎ। ততো হোতা ব্রহ্মাণং গন্ধাদিনাভ্যর্চ্চ্য জপেৎ। প্রজাপতির্ঋষি স্তুষ্টুপ্ছন্দো হগ্নির্দ্দেবতা ব্রহ্মজপে বিনিয়োগঃ। ওঁ বৃহস্পতে ব্রহ্মাব্রহ্মসদন আশিষ্যতে বৃহস্পতের্যজ্ঞং গোপায় স যজ্ঞং পাহি স যজ্ঞপতিং পাহি স মাং পাহি। ওঁ গোপায়ামীতি ব্রহ্মা বদেৎ। ততো হোতা পাত্রাণামাসাদন মুদগগ্রেষু কুশেষু কুর্য্যাৎ। যথা প্রোক্ষণী প্রণীতা আজ্যস্থালী চরুস্থালী আজ্যং তণ্ডুলাঃ দর্ব্বী কমণ্ডলুঃ শ্রুক্শ্রুবৌ বর্হিরিধ্মা অন্যান্যুপযুক্ত দ্রব্যাণি। ইধ্মানি পঞ্চদশপলাশোদ্ভবানি অসম্ভবে অন্য যজ্ঞীয় বৃক্ষোদ্ভবানি অরত্নি প্রমাণানি নবকুশপত্রৈ স্ত্রিগুণং কৃত্বা সকৃদ্বেষ্টিতা কুশমুষ্টির্বর্হিঃ। ততো দ্বে দ্বে পাত্রে হসংশ্লিষ্টে পাণিভ্যাং গৃহীত্বা অধোমুখে স্থাপনীয়ে। ততঃ সপবিত্রামনামিকাং কৃত্বা প্রোক্ষণীমুত্তানয়েৎ। ইতর পাত্রাণ্যপি প্রোক্ষণী মদ্ভিঃ পূরয়িত্বা প্রাকপ্লবনং কিঞ্চিদুদকং শ্রাবয়েৎ। উৎপূয় তজ্জলেন সর্ব্বাণি দ্রব্যাণি প্রোক্ষয়েৎ। ততঃ কমণ্ডলুং সোদকং কৃত্বা তেনোদকেন প্রণীতাং পূরয়িত্বা প্রাক্প্লবনং কিঞ্চিদুদকং শ্রাবয়েৎ। প্রণীতায়াং পবিত্রং যবপুষ্পে চ দত্বা ত্রিরুৎপূয় ব্রহ্মাণং পৃচ্ছেৎ। প্রজাপতি-র্ঋষির্গায়ত্রীচ্ছন্দো ব্রহ্মাদেবতা হপপ্রণয়নার্থজপে বিনিয়োগঃ। ওঁ ব্রহ্মন্নপ প্রণেষ্যামি। ওঁ বৃহস্পতির্ব্রহ্মা ব্রহ্মসদন আশি-

ষ্যতে বৃহস্পতির্যজ্ঞং গোপায় স যজ্ঞং পাহি স যজ্ঞপতিং পাহি স মাং পাহি। ততো ব্রহ্মা প্রজাপতির্ঋষিব্রহ্মাদেবতা ব্রহ্ম-
জপে বিনিয়োগঃ। ওঁ ভূর্ভুবঃ স্বর্বৃহস্পতিঃ প্রসূত ইতি জপিত্বা ওঁ প্রণয় ইতি বদেৎ। ততঃ প্রণীতামগ্নেরুত্তরে ব্রহ্ম-
সংমুখে কুশাস্তৃপত্রৈরাচ্ছাদ্য স্থাপয়েৎ। তত আজ্যস্থাল্যাং স্থাপিতমাজ্যং নিরূপ্যাগ্নেরুত্তরতোঽঙ্গারমাকৃষ্য দ্রবীকরণং জ্বলৎ
কুশেনাজ্যং সংবেষ্ট্য তৎকুশপত্রদ্বয়মাজ্যে নিরূপ্যাজ্যং শোধয়েৎ। পুনরপি জ্বলৎকুশেন সংবেষ্ট্য তৎকুশমাজ্যে নিক্ষিপ্যাজ্য-
মানীয় সংমুখে বর্হিষি স্থাপয়েৎ। আকৃষ্টাঙ্গারমগ্নৌ নিক্ষিপ্যাজ্যোৎপবনং কুর্য্যাৎ। সাগ্রগর্ভশূন্যং কুশপত্রদ্বয়ং প্রাদেশ-
প্রমাণং ছিনত্তি। প্রজাপতির্ঋষিঃ পবিত্রে দেবতে পবিত্রচ্ছেদনে বিনিয়োগঃ। ওঁ পবিত্রে স্থো বৈষ্ণব্যৌ। ততো বামহস্তে
পবিত্রং কৃত্বা প্রজাপতির্ঋষিঃ পবিত্রে দেবতে পবিত্রমার্জ্জনে বিনিয়োগঃ। ওঁ বিষ্ণোর্মনসা পূতেস্থ ইত্যভ্যুক্ষ্য তৎকুশপত্রদ্বয়- ৪২৬
মাজ্যে নিক্ষিপ্য প্রাগগ্রমগ্রে দক্ষিণহস্তানামিকাঙ্গুষ্ঠাভ্যাং মূলে চ বামহস্তানামিকাঙ্গুষ্ঠাভ্যাং ধৃত্বাধোমুখো ব্যস্তপাণিঃ কুশমধ্যে-
নাগ্নাবাজ্যোৎক্ষেপঃ হিরণ্যস্তূপর্ঋষি রুষ্ণিকচ্ছন্দঃ সবিতা দেবতা আজ্যোৎপবনে বিনিয়োগঃ। ওঁ সবিতুস্ত্বা প্রসব উৎপুনা-
ম্যচ্ছিদ্রেণ পবিত্রেণ বসোঃ সূর্য্যস্য রশ্মিভিঃ স্বাহা। ইত্যনেন প্রথমমুৎপুনাতি দ্বিস্তূষ্ণীং। ততস্তৎ পবিত্রং প্রোক্ষ্যাগ্নৌ
ক্ষিপেৎ। ততঃ সপ্রণব ব্যাহৃতিকাং গায়ত্রীং ওঁ সবিতুস্ত্বা ইত্যাদি চ পঠেৎ। ততঃ স্রুক্স্রুবৌ প্রক্ষাল্য প্রতপ্য দর্ভৈরুপযুজ্য
পুনঃ প্রক্ষাল্য প্রতপ্য সতপ্তং নিধায় উদগগ্রেষু কুশেষু স্থাপয়েৎ। ততশ্চরুশ্রবণং প্রকৃতে কর্ম্মণি রৌদ্র সৌম্য ঐন্দ্রচরু
শ্রবণাৎ চরুত্রয়ং শ্রপয়েৎ॥ তদ্যথা। প্রণবেন ব্রীহীনাহৃত্য ওঁ রুদ্রায় ত্বা জুষ্টং নির্ব্বপামীতি উদূখলে নিরূপ্য ওঁ রুদ্রায়

ত্বা জুষ্টং প্রোক্ষয়ামীতি প্রোক্ষণ্যুদকেন প্রোক্ষ্য মুষলেনাবহত্য সূর্পেণ ত্রিঃ প্রস্ফোট্য বিতুষীকৃত্য সপবিত্রায়াং চরুস্থাল্যাং তণ্ডু-
লানি কৃত্বা পয়সা পচেৎ মন্দমন্দেন বহ্নিনা। এবং সৌম্যং পায়সং ঐন্দ্রং যাবকং সিদ্ধং পাকং জ্ঞাত্বা জ্বলদুল্মুকেনাবলোক্য
মধ্যেষু ঘৃতশ্রুবত্রয়ং চরুত্রয়ে দদ্যাৎ। ততো হগ্নেরুত্তরে আস্তীর্ণদর্ভে উত্তরোত্তরং স্থাপয়েৎ। ততো বসুশ্রুতঋষি স্ত্রিষ্টুপ্ছন্দো
হগ্নির্দ্দেবতা হগ্ন্যর্চ্চনে বিনিয়োগঃ। ওঁ বিশ্বানিনো দুর্গহা জাতবেদঃ। সিন্ধুর্ন নাবাদুরিতাতি পার্ষি রগ্নেরত্রিরনুমসা গৃণানো-
হস্মাকং বোধ্যবিতাতনূনাং। ওঁ যস্ত্বা হৃদাকিরীনাং মন্যমানো মর্ত্ত্যা যোহবীমি জাতবেদো যশোহস্মাসু ধেহি প্রজাভিরগ্নে হমৃতত্ব-
মন্যাং। ওঁ যস্মৈ ত্বমকৃতে জাতবেদ উলোকমগ্নে কৃণনস্যোনং আশ্বিনং সপুত্রিনং বীরবন্তং গোমন্তং বয়িনস তে স্বস্তি। এভি-
র্মন্ত্রৈরর্ঘ্যগন্ধতাম্বুলৈরগ্নিমলংকুর্য্যাৎ। প্রজাপতির্ঋষিরগ্নির্দেবতা ইন্ধনাদিপ্রতপনে বিনিয়োগঃ। ওঁ প্রত্যুষ্টং রক্ষ প্রত্যুষ্ট 
মারাতয়ো নিষ্টপ্তং রক্ষ নিষ্টপ্তমারাতয় ইত্যনেন ইধ্মং প্রতপ্য ওঁ বিশ্বানিনো দুর্গহা ইত্যাদিনা পুনরগ্নিমলংকৃত্য ইধ্মরজ্জা-
বামকরং সংবেষ্ট্য বামকরে ইধ্মং কৃত্বা মূলমধ্যাগ্রদেশেষু ঘৃতেনাভিঘার্য্য বামদেবঋষি স্ত্রিষ্টুপ্ছন্দো হগ্নির্দ্দেবতা ইধ্মাধানে
বিনিয়োগঃ। ওঁ অয়ন্ত ইধ্ম আত্মা জাতবেদস্তেনেধ্ম সচেদ্বর্দ্ধস্ব সচেদ্বর্দ্ধয় চাস্মান্ প্রজয়া পশুভি ব্রহ্মবর্চ্চসেনান্নাদ্যেন সমেধয়
স্বাহা। ইত্যনেন জুহুয়াৎ। ওঁ অগ্নয়ে জাতবেদসে ইদং। ততস্তূষ্ণীমাঘারৌ জুহুয়াৎ। তদ্যথা॥ শ্রুবেণ চতুরাজ্যং শ্রুচি
দত্ত্বা চতুর্থ্যন্তং প্রজাপতিং মনসা ধ্যাত্বা তূষ্ণীমগ্নের্বায়ুকোণাদারভ্যাগ্নেয়ীং যাবদবিচ্ছিন্ন ঘৃতধারাদানং পুনরপি শ্রুবেণ চতুরাজ্যং
শ্রুচি দত্ত্বা ইন্দ্রং মনসা ধ্যাত্বা তূষ্ণীমগ্নের্নৈর্ঋতকোণাদারভ্য ঐশানীং যাবদবিচ্ছিন্ন ঘৃতধারাদানং। তত আজ্যভাগৌ জুহুয়াৎ।

অগ্নেরুত্তরভাগে শ্রুবেণাজ্যেন জুহোতি। ওঁ অগ্নয়ে স্বাহা ইদমগ্নয়ে। দক্ষিণভাগে ওঁ সোমায় স্বাহা ইদং সোমায়। ততো অবদান ধর্ম্মেণ শ্রুচি চরুমাদায়। ওঁ কদ্রু রুদ্রায় প্রচেতসে মিঢ়ুষ্টমায় তব্যসে বোচেম সন্তমং হৃদে স্বাহা। ইতি জুহুয়াৎ। এবং সৌম্যং পায়সং তথৈব গৃহীত্বা ওঁ সোমরুদ্রাধারয়েথাম সূর্য্যাং পুরামিষ্টয়ো মবশ্রুবন্তু দমে দমে সপ্তরত্নাদধানাং সন্নোভূতং দ্বিপদেশঞ্চতুষ্পদে স্বাহা। তত ঐন্দ্রং যাবকং তথৈব গৃহীত্বা। ইন্দ্রায়েন্দ্রো মরুত্ব তে পবস্ব মধুমত্তমং আরত্নায়োনিম্বতস্থাসীদৎ স্বাহা। ইতি হুত্বা স্তোকস্তোকেন ওঁ ভৌমায় দিব্যায় অন্তরীক্ষায় পৃথিব্যৈ মহতে চ স্বাহা। অন্তে চ রুদ্রেভ্যঃ। তত আজ্যেন রুদ্রনবগ্রহদিকপালসোমদুর্গাবাস্তুপুরুষাণাং স্বস্বমন্ত্রৈর্হোমঃ কার্য্যঃ। ততঃ প্রায়শ্চিত্ত হোমঃ। তত্রাদৌ অদ্যেত্যাদি কৃতৈতৎ সোপকরণ বৎসতরীচতুষ্টয় সহিত বৃষোৎসর্গ কর্ম্মাঙ্গভূত হোমকর্ম্মণি যদ্বৈগুণ্যং জাতং তদ্দোষপ্রশমনায় প্রায়শ্চিত্ত হোমমহং কুর্ব্বীয় ইতি সঙ্কল্পয়েৎ। ততো বিধুনামানমগ্নিমভ্যর্চ্চ শ্রুবেণাজ্যেন জুহুয়াৎ। বিদমদঋষিঃ পংক্তিচ্ছন্দো ঽগ্নির্দেবতা প্রায়শ্চিত্ত হোমে বিনিয়োগঃ। ওঁ অয়াশ্চাগ্নে ঽস্যনভিশস্তিপাশ্চ সত্যমিথময়া অসি। অয়সা বয়সা কৃতোয়সন্ হব্যমুহিসে অয়া নো ধেহি ভেষজং স্বাহা। ওঁ মগ্নয়ে অয়ানসে ইদং। মেধাতিথিঋষি র্গায়ত্রীচ্ছন্দোঽগ্নির্দেবতা প্রায়শ্চিত্তহোমে বিনিয়োগঃ। ওঁ অতো দেবা অবন্তু নো যতো বিষ্ণুর্বিচক্রমে পৃথিব্যা সপ্তধামভিঃ স্বাহা। ইদং দেবেভ্যঃ। মেধাতিথিঋষি র্গায়ত্রীচ্ছন্দো বিষ্ণুর্দেবতা প্রায়শ্চিত্তহোমে বিনিয়োগঃ। ওঁ ইদং বিষ্ণুর্বিচক্রমে ইত্যাদি ইদং বিষ্ণবে। প্রজাপতি ঋষির্গায়ত্রীচ্ছন্দো ঽগ্নির্দেবতা প্রায়শ্চিত্তহোমে বিনিয়োগঃ। ওঁ ভূরগ্নয়ে পৃথিব্যৈ দিব্যায় মহতে চ স্বাহা। ইদং ভুরগ্নয়ে। প্রজাপতির্ঋষি র্বায়ুর্দেবতা প্রায়শ্চিত্তহোমে বিনিয়োগঃ। ভুবো বায়বে

চান্তরীক্ষায় বিদ্যায় মহতে চ স্বাহা। ইদং ভূবো বায়বে। প্রজাপতির্ঋষিঃ সূর্য্যোদেবতা প্রায়শ্চিত্তহোমে বিনিয়োগঃ। ওঁ স্বঃ সূর্য্যায় বিদ্যায় মহতে চ স্বাহা॥ ইদং স্বঃ সূর্য্যায়। প্রজাপতির্ঋষিশ্চন্দ্রনক্ষত্রদিশো দেবতা প্রায়শ্চিত্তহোমে বিনিয়োগঃ। ওঁ ভূর্ভুবঃ স্বশ্চন্দ্রমসে নক্ষত্রেভ্যশ্চ দিগ্‌ভ্যশ্চ দিব্যায়। মহতে চ স্বাহা। ইদং বায়বে। অত্রিতঋষিস্ত্রিষ্টুপ্‌ছন্দো ঽগ্নির্দেবতা প্রায়শ্চিত্তহোমে বিনিয়োগঃ। ওঁ যৎপাকত্রান্নমীমাদীন্ দক্ষান্ যজ্ঞস্য মনুতে স মে মর্তমসঃ অগ্নিস্তদ্ধোতা ক্রতুবিদ্বিজানন্ যজিষ্ঠো-দেবানাং ঋতুপূর্ণাং স্বাহা। ইদমগ্নয়ে। ওঁ যদ্বো দেবাশ্চক্রিম জিহ্বয়া গুরুং মনসো বা প্রস্মৃতি দেবহেলনং। অবাবাকয়া নো ঽভিদ্রুশ্চলাশতে তস্মিনদেনো বসবো নিধেতন স্বাহা। ইদ্‌মগ্নয়ে। ওঁ পুরুষঃ সম্মিতো যজ্ঞো যজ্ঞপুরুষঃ সম্মিতঃ। অগ্নে তদস্য কল্পয় ত্বং হি বেত্থ যথাযথং স্বাহা। ইদমগ্নয়ে। ততঃ স্বিষ্টিকৃদ্ধোমঃ। তত্রাবদানধর্ম্মেণ শ্রুচি চরুমাদায় হিরণ্যগর্ভঋষির্গায়ত্রীছন্দো ঽগ্নিস্বিষ্টিকৃদ্দেবতে স্বিষ্টিকৃদ্ধোমে বিনিয়োগঃ। ওঁ যদস্য কর্ম্মণোঽত্যারীরিচং যদ্বা ন্যূনমিহাকরং। অগ্নিস্তৎস্বিষ্টিকৃদ্বিদ্বান্, সর্ব্বং স্বিষ্টিং করোতু তে। অগ্নয়ে স্বিষ্টিকৃতে সুহুতহুতয়ে সর্ব্বপ্রায়শ্চিত্তাহুতীনাং কামানাং সমর্দ্ধয় স্বাহা। ইদমগ্নয়ে স্বিষ্টিকৃতে ইতি হুত্বা ওঁ রুদ্রায় স্বাহা ইতি ইদ্ধবন্ধনী রজ্জুংবি শ্রংস্য ঘৃতাক্তাং জুহুয়াৎ। স্বয়ং হোতৃপক্ষে আত্মনঃ শিরসি অন্যশ্চেদ্যজমা-নস্য বর্হিষি প্রণীতামানীয় তোনোদকেন কুশৈরভিষিঞ্চেৎ। ওঁ সুমিত্রিয়ান আপওষধয়ঃ সন্তু ওঁ দুর্ম্মিত্রিয়াস্তস্মৈ-সন্তু যোঽস্মান্দ্বেষ্টি যঞ্চ বয়ং দ্বিষ্মঃ। সিন্ধুদ্বিপঋষির্গায়ত্রীছন্দ আপোদেবতামার্জ্জনে বিনিয়োগঃ ওঁ ইদমাপ প্রবহত যৎকিঞ্চিদ্দুরিতং ময়ি। যদ্বাহ মভিদ্রুদোহ যদ্বা শেফ উতানৃতং। প্রজাপতির্ঋষিস্ত্রিষ্টুপ্‌ছন্দ আপোদেবতা মার্জ্জনে বিনিয়োগঃ। ওঁ আপো হিষ্মামাতরঃ

শুদ্ধয়ন্তু ঘৃতেন বো ঘৃতপুঃ পুনন্তু। বিশ্বং হি বিপ্রং প্রবহন্তি দেবীরুদিতাভ্যঃ শুচিরাপূতয়েমি ইত্যভিবিচ্য ওঁ পূর্ণমসীত্যনেন
পরিসমূহন পর্য্যুক্ষণে কুর্য্যাৎ। ততো বৃষস্কারুণগন্ধাঙ্কিতমঙ্কযুগ্মং গোপালকপ্রধ্বাপিতেন লৌহেন স্পৃষ্টং কুর্য্যাৎ। ততো
বৎসতরীচতুষ্টয়সহিতং বৃষং পঞ্চশস্যচূর্ণ সর্ব্বৌষধি জলৈঃ স্নাপয়েৎ। ওঁ ইদমাপ প্রবহত যৎকিঞ্চিদ্দুরিতং ময়ি যদ্বাহমভি
দুদ্রোহ যদ্বা শেপ উতানৃতং॥ ওঁ যাসাং রাজা বরুণো যাতি মধ্যে সত্যানৃতে অবপশ্যঞ্জনানাং। যা অগ্নিং গর্ভং দধিরে সুপর্ণাস্তা
আপো দেবীরিহ মামবন্তু। ওঁ যাসাং দেবা দিবি কৃন্বন্তি ভক্ষং যা অন্তরীক্ষে বহুধা ভবন্তি। যা অগ্নিং গর্ভং দধিরে সুপর্ণাস্তা
আপো দেবীরিহ মামবন্তু। ওঁ আপোঽদ্যান্বচারিষং রসেন সমগস্মহি। পয়স্বানগ্ন আগহি তন্মা সংসৃজ বর্চ্চসা। ওঁ দেবীরাপো-
ঽগ্রে পুরঃ অগ্রেহরমর্ত্ত্যয়গ্রং নয় স্বধা যজ্ঞপতিং দেব স্বধায়ুধং। ওঁ আপোহিষ্ঠেত্যাদি তিসৃভিঃ সংস্নাপ্য সিতধৌতবাসসা জলমপনীয় ৫০০
গন্ধপুষ্পাঞ্জনসিন্দূরগোরোচনাদিভি র্মঙ্গলদ্রব্যৈঃ স্বর্ণশৃঙ্গ রজতক্ষুর বীরপট্ট রজতত্রিশূল তাম্রপৃষ্ঠে কাংস্যক্রোড় ঘণ্টাচামর দর্পণৈ
র্বৃষভং বৎসতরীচতুষ্টয়ঞ্চালংকুর্য্যাৎ। অলঙ্কারন্যাস মন্ত্রোযথা। ওঁ চত্বারি শৃঙ্গাস্ত্রয়োঽস্য পাদা ইতি স্বর্ণশৃঙ্গস্য। ওঁ রাজতং
তমধ্বানং গোপায়িতস্য দীদিবং। সংগচ্ছ ত্বং সদিবং বর্দ্ধমানং দিবে দিবে॥ ইতি রজতক্ষুরস্য। ওঁ অসৌ যস্তাম্রোঽরুণ উত-
বভ্রুঃ সুমঙ্গলঃ। যে চৈনং রুদ্রাঽভিতো দিক্ষু শ্রিতাং সহস্রশো বৈষাং হেলঈমহে। ইতি তাম্রপৃষ্ঠস্য। ওঁ কাংস্যোস্মিতাং হিরণ্য-
প্রকারা মার্দ্রাং জ্বলন্তীং তৃপ্তা তাং তর্পয়ন্তী পদ্মেস্থিতাং পদ্মবর্ণাং তামিহোপহ্বয়ে শ্রিয়ং ইতি কাংস্যক্রোড়স্য। ওঁ কদ্রুরুদা-
য়েতি রজতত্রিশূলস্য। ওঁ বিষ্ণোর্ব্বরাটমসি বিষ্ণোঃ সুপ্তেস্থো বিষ্ণোঃ স্যূরসি বিষ্ণোর্ধ্রুবোসি বৈষ্ণবমসি বিষ্ণবে ত্বা। ইতি